श्रीबाला-स्तव-मञ्जरी

श्रीबाला स्तव मंजरी

सम्पादक

'कुल-भूषण' पण्डित रमादत्त शुक्ल, एम० ए०

प्रकाशक

पं० देवीदत्त शुक्ल स्मारक

कल्याण मन्दिर प्रकाशन

प्रयाग—६

प्रकाशक
कल्याण मन्दिर प्रकाशन
अलोपी देवी मार्ग
प्रयाग-राज २११००६ (उ. प्र.)

दूर-भाष : (०५३२) ६६२७८३

चतुर्थ संस्करण

चैत्र शुक्लाष्टमी, 'सर्व-धारी' सं० २०५२ वि०–१७ अप्रैल, १९९५

मूल्य २५००

मुद्रक
वरा वाणी प्रेस
अलोपी देवी मार्ग
प्रयाग-राज २११००६ (उ० प्र०)

अनुक्रमणिका

	श्रीबाला-त्रिपुर-सुन्दरी ध्यानावली	(छः)
	दो शब्द	(सात)
१	श्रीबाला-कवचम्	१
२	श्रीबाला-त्रैलोक्य-विजय-कवचम्	३
३	श्रीबाला-हृदय-स्तोत्रम्	८
४	अष्टोत्तर-शत-नाम-स्तोत्रम्	१२
५	दुःस्वप्न-नाशक श्रीबाला-कवचम्	१५
६	माँ दश-मयी बाला-स्तोत्रम्	१८
७	श्रीबाला खड्ग-माला स्तोत्रम्	२१
८	श्रीबाला माला-मन्त्रम्	२३
९	श्रीबाला कर्पूर-स्तोत्रम्	२५

१० श्रीबाला सहस्राक्षरी स्तोत्रम् २८

११ श्रीबाला सहस्र-नामकम् ३३

१२ श्रीबाला स्तव-राजः ५६

१३ श्रीबाला मकरन्द-स्तवम् ६१

१४ श्रीबाला भुजङ्ग-स्तोत्रम् ६६

१५ श्रीबाला मुक्तावली-स्तोत्रम् ६८

१६ श्रीबाला पञ्च-चामर-स्तोत्रम् ७०

१७ श्रीबाला मन्त्र-गर्भाष्टकम् ७२

१८ श्रीबाला-पञ्चाङ्गम् ७४

१९ श्रीबाला पञ्च-रत्न-स्तोत्रम् ७६

२० श्रीबाला-सूक्तम् ७८

२१ श्रीबालोपनिषद् ८०

२२ श्रीबाला शान्ति-स्तोत्रम् ८२

२३ श्रीबाला-पटलम्	८४
२४ श्रीबाला त्रिंशति-स्तोत्रम्	९१
२५ श्रीबाला-चरणाष्टकम्	९७
२६ श्रीबाला महिम्न-स्तोत्रम्	१००
२७ श्रीत्रिपुरा-बाला पटलम्	१०७
२८ श्रीबाला सहस्र-नाम-स्तव-राजः	११३
२९ श्रीबाला मन्त्र-सिद्धि-स्तवम्	१३३
३० श्रीबकारादि बाला-नाम-साहस्रं	१३५
श्रीबाला-त्रिपुरा साधना-क्रम	१५७

श्रीबाला-त्रिपुरा ध्यानावली

[१]

बाल रवि जैसी दुति जगर-मगर होति,
वसन विमल लाल शोभा सरसावै है ।
मोतिन को गल माल कङ्कन जड़ाऊ हाथ,
अङ्ग-अङ्ग भूषन अनूप छवि छावै है ।
वर दै अभय देति विद्या सों सुभाव भरि,
अक्ष-जप-साधन को मारग सुझावै है ।
बड़-भागी साधक सो जाके उर माँहि सदा,
मैया की सुछवि यह छाप निज लावै है ।।

[२]

बाल दिवाकर सों छवि-मान,
विलोचन तीन भली छवि छाजै ।
अम्बर रक्त लसै अभिराम,
करै वर पाठ जपै जग काजै ।
दै वर भीति हरै चित लाय,
दुखी-जन को सुख आपुहि साजै ।
श्रीत्रिपुरा कमलासन माँझ,
दया-मयि सुन्दरि मातु विराजै ।।



'श्री बाला - स्तव - मञ्जरी' का प्रथम संस्करण आज से २५ वर्ष पूर्व चैत्र पूर्णिमा २०१० को प्रकाशित हुआ था। उसे भगवती श्री बाला त्रिपुर-सुन्दरी के उपासकों ने हृदय से अपनाया। फलतः उसका द्वितीय संस्करण सम्वत् २०२० में प्रकाशित किया गया। उसके समाप्त होने पर विचार किया गया कि अन्य उपलब्ध स्तोत्रों को भी इस स्तोत्र-संग्रह में संगृहीत कर इसे सर्वाङ्ग-पूर्ण बनाया जाय। फलतः तृतीय संस्करण में स्तोत्रों की संख्या २३ से बढ़कर ३१ हो गई। आज इसके चतुर्थ संस्करण का प्रकाशन हो रहा है। हमें विश्वास है कि भगवती श्रीबाला के भक्त इससे प्रसन्न होंगे।

प्रथम संस्करण की भूमिका में 'कौल - कल्पतरु' पण्डित देवीदत्त शुक्ल ने स्तोत्रों के महत्त्व के सम्बन्ध में जो प्रवचन लिखाया था, वह अति उद्बोधक है। अतः उसे यहाँ ज्यों-का-त्यों उद्धृत किया जा रहा है—

"····उपासना के क्षेत्र में स्तोत्रों का अपना एक अलग स्थान है। ऐसे स्तव वैदिक काल से लेकर अब तक आस्तिक - समाज में समुचित आदर ही नहीं पाते रहे हैं, किन्तु उनसे कितने ही लोग कल्याण - साधन भी करते पाए जाते हैं। इन स्तवों में

तान्त्रिक स्तवों की अपनी विशेषता सबसे पृथक् रही है। परन्तु वे उतनी अधिक संख्या में प्रकाश में नहीं आए हैं, प्रायः हस्त-लिखित रूप में ही वे साधकों में प्रचलित पाए जाते हैं।

"समय की गति के कारण अब लोगों में पुस्तक-लेखन की अभिरुचि नहीं रह गई है। इसका एक परिणाम यह भी हुआ है कि तान्त्रिक सिद्ध स्तोत्रों को लिखकर सुरक्षित रखने की प्रणाली का ही लोप हो गया है। अतएव इन स्तोत्रों का पुस्तक-रूप में छपना नितान्त आवश्यक हो गया। इसी आवश्यकता से प्रेरित होकर हमने 'सिद्ध स्तोत्र-माला' नाम की पुस्तक-माला प्रकाशित की है। इसमें साधकों के बीच व्यवहार में आनेवाले भिन्न-भिन्न देवी-देवताओं के संग्रह निकलेंगे।…"

'श्रीबाला-स्तव-मञ्जरी' के प्रस्तुत चतुर्थ संस्करण के अन्त में संक्षिप्त श्रीबाला-त्रिपुरा साधना-क्रम भी दिया जा रहा है। आशा है, भगवती बाला के भक्त इससे लाभान्वित होंगे।

'चण्डी'-कार्यालय
प्रयाग-राज–२११००६ (उ. प्र.)
१७ अप्रैल, १९९५

—'कुल-भूषण'

श्रीबाला-कवचम्

॥ पूर्व-पीठिका—श्रीदेव्युवाच ॥

देव - देव महा - देव, भक्तानां प्रीति - वर्द्धनं ।
सूचितं यन्मया देव्याः, कवचं कथयस्व मे ॥१

॥ श्री महा-देव उवाच ॥

शृणु देवि ! प्रवक्ष्यामि, कवचं देव - दुर्लभं ।
अप्रकाश्यं परं गुह्यं, साधकाभीष्ट - सिद्धये ॥२
कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः ।
छन्दः पंक्तिर्देवताऽत्र बाला - त्रिपुर - सुन्दरी ॥३
धर्मार्थ - काम - मोक्षाणां, विनियोगस्तु साधने ।
वाग्भवं कामराजं च, शक्ति - बीजमुदाहृतम् ॥४

॥ मूल-स्तोत्र ॥

वाग्भवं पातु शिरसि, काम - राजं सदा हृदि ।
शक्ति-बीजं सदा पातु, नाभौ गुह्ये च पादयोः ॥१
ऐं क्लीं सौः वदने पातु, बाला सर्व-सिद्धये ।
जिह्वां पातु महा - हंसी, स्कन्ध-देशे तु भैरवी ॥२
सुन्दरी नाभि - देशं तु, शिरसि कमला सदा ।
भ्रुवौ नासा-द्वयं पातु, महा - त्रिपुर - सुन्दरी ॥३
ललाटे शुभगा पातु, कण्ठ - देशे तु मालिनी ।
वाग्भवं पातु हृदये, उदरे भग - रूपिणी ॥४

भग-मालिनी नाभि-देशे, लिङ्गे पातु मनोभवा ।
गुह्ये पातु महा-देवी, राज - राजेश्वरी शिवा ।।५
चैतन्य - रूपिणी पातु, पादयोर्जगदम्बिका ।
नारायणी सर्व - गात्रे, सर्व - काले शिवङ्करी ।।६
ब्रह्माणी पातु मां पूर्वे, दक्षिणे पातु वैष्णवी ।
पश्चिमे पातु वाराही, उत्तरे तु महेश्वरी ।।७
आग्नेयां पातु कौमारी, महा-लक्ष्मीस्तु नैऋते ।
वायव्यां पातु चामुण्डा, इन्द्राणी पातु ईशके ।।८
आकाशे च महा-माया, पृथिव्यां सर्व-मङ्गला ।
आत्मानं पातु वरदा, सर्वाङ्गे भुवनेश्वरी ।।९

।। फल-श्रुति ।।

यदीदं कवचं देव्याः, त्रैलोक्ये चापि दुर्लभम् ।
यः पठेत् प्रातरुत्थाय, शुचिः प्रयत - मानसः ।।१
न रोगो नापदो व्याधिर्भयं क्वापि न जायते ।
न च मूर्ख - भयं तस्य, पातकानां भयं कदा ।।२
न दारिद्र्य-वशं गच्छेत्, मृत्यु-नाशं यथाऽरयः ।
गच्छेच्छिव - पुरं देवि ! सत्यं सत्यं वदाम्यहं ।।३
यदीदं कवचं ज्ञात्वा, श्रीबालां यो जपेत् प्रिये !
स प्राप्नोति फलं सर्वं, शिव - सायुज्य-सम्भवं ।।४

।। श्रीसिद्ध-यामले श्रीबाला-कवचं सम्पूर्णं शुभमस्तु ।।

श्रीबाला-त्रैलोक्य-विजय-कवचम्

॥ पूर्व-पीठिका—श्रीभैरव उवाच ॥

अधुना ते प्रवक्ष्यामि, कवचं मन्त्र - विग्रहम् ।
त्रैलोक्य - विजयं नाम, रहस्यं देव-दुर्लभम् ॥१

॥ श्रीदेव्युवाच ॥

या देवी त्र्यक्षरी बाला, चित्कला श्री सरस्वती ।
महा - विद्येश्वरी नित्या, महा - त्रिपुर - सुन्दरी ॥२
तस्याः कवचमीशान ! मन्त्र - गर्भं परात्मकम् ।
त्रैलोक्य - विजयं नाम, श्रोतुमिच्छामि तत्त्वतः ॥३

॥ श्रीभैरव उवाच ॥

देव-देवि महा - देवि ! बाला-कवचमुत्तमम् ।
मन्त्र - गर्भं परं तत्त्वं, लक्ष्मी - सम्वर्धनं महत् ॥४
सर्वस्वं मे रहस्यं मे गुह्यं त्रिदश-गोपितम् ।
प्रवक्ष्यामि तव स्नेहान्नाख्येयं यस्य कस्यचित् ॥५
यं धृत्वा कवचं देव्या, मातृकाक्षर - मण्डितम् ।
नारायणोऽपि दैत्येन्द्रान्, जघान रण - मण्डले ॥६
त्र्यम्बकं काम - देवोऽपि, बलं शक्रो जघान हि ।
कुमारस्तारकं दैत्यमन्धकं चन्द्र - शेखरः ॥७

अवधीद् रावणं रामो, वातापीं कुम्भ-सम्भवः ।
कवचस्यास्य देवेशि ! धारणात् पठनादपि ।।८
स्रष्टा प्रजापतिर्ब्रह्मा, विष्णुस्त्रैलोक्य-पालकः ।
शिवोऽणिमादि - सिद्धीशो, मघवा देव-नायकः ।९
सूर्यस्तेजोनिधिर्देवि ! चन्द्रस्तारापिधः स्थितः ।
वह्निर्महोर्मि - निलयो, वरुणोऽपि दिशां पतिः ।१०
समीरो बलवांल्लोके, यमो धर्म-निधिः स्मृतः ।
कुबेरो निधि-नाथोऽस्ति, नैर्ऋतिः सर्व-राक्षसां ।।११
ईश्वरः शङ्करो रुद्रो, देवि ! रत्नाकरोऽम्बुधिः ।
अस्य स्मरण-मात्रेण, कौलिकस्य कुलेश्वरि ! ।।१२
आयुः कीर्तिर्प्रभा लक्ष्मीर्वृद्धिर्भवति सन्ततं ।
कवचं सुभगं देवि ! बालायाः कौलिकेश्वरि !।१३

।। विनियोग ।।

ऋषिः स्याद् दक्षिणामूर्तिः, पंक्तिश्छन्दरुदाहृतः ।
बाला सरस्वती देवि ! देवता त्र्यक्षरी स्मृता ।। बीजं तु वाग्भवं प्रोक्तं, शक्तिः शक्तिरुदाहृता । कीलकं काम - राजं तु, फडाशा बन्धनं तथा । भोगापवर्ग-सिद्धयर्थं विनियोगः प्रकीर्तितः ।।

।। मूल स्तोत्र ।।

ऐं बीजं मे शिरः पातु, क्लीं बीजं भृकुटी मम ।
सौः भालं पातु मे बाला, ऐंक्लींसौः नयने मम ।।१

अंआंइंईं श्रुतौ पातु, बाला पञ्चाक्षरी मम ।
उंऊंऋंॠंऌं सदा पातु, मम नासा-पुट-द्वयम् ।।२
लृंॡंएंऐं पातु गण्डौ, ऐंक्लींसौः त्रिपुराम्बिका ।
ओंऔंअंअः मुखं पातु, सौःक्लींऐं त्रिपुरेश्वरी ।।३
कंखंगंघंङं मे पातु, सौःक्लींऐं भग - मालिनी ।
चंछंजंझंञं मे पातु, बाहौ सौः सर्व - सिद्धिदा ।।४
टंठंडंढंणं मे पातु, वक्षौ क्लीं वीर - नायिका ।
तंथंदंधंनं मे पातु, कुक्षौ क्लीं कुल - नायिका ।।५
पंफंबंभंमं मे पातु, पार्श्वौ परम - सुन्दरी ।
यंरंलंवं पातु पृष्ठं, सौःक्लींऐं विश्व-मातृका ।।६
शंषंसंहं पातु नाभिं, सौःसौःसौः त्रिगुणात्मिका ।
ळंक्षं कटिं सदा पातु, क्लींक्लींक्लीं मातृकेश्वरी ।।७
एंऐंऐं पातु लिङ्गं मे, भग-लिङ्गामृतेश्वरी ।
ऐंक्लीं गुह्यं सदा पातु, भग-लिङ्ग-स्वरूपिणी ।।८
सौःक्लीं उरू सदा पातु, वेद-माताष्ट-सिद्धिदा ।
सौःऐं जानु सदा पातु, महा-मुद्राभि-मुद्रिता ।।९
सौःऐंक्लीं पातु मे जङ्घौ, बाला त्रिभुवनेश्वरी ।
ऐंऐंसौःसौः पातु गुल्फौ, त्रैलोक्य-विजय-प्रदा ।।१०
ऐंऐंक्लींक्लीं पातु पादौ, बाला त्र्यक्षर-रूपिणी ।
शिरसः पाद - पर्यन्तं, सर्वावयव - संयुतम् ।।११

पायात् पादादि-शीर्षांतं, ऐंक्लींसौः सकलं वपुः ।
ब्राह्मी मां पूर्वतः पातु, वह्नी नारायणी तथा ।।१२
माहेश्वरी दक्षिणेऽव्यान्नैऋत्ये चण्डिकाऽवतु ।
पश्चिमे पातु कौमारी, वायव्ये चापराजिता ।।१३
वाराही तूत्तरे पायादीशान्यां नारसिंहिका ।
प्रभाते भैरवी पातु, मध्याह्ने योगिनी क्रमात् ।।१४
सायं मां वटुकः पायादर्द्ध - रात्रे शिवोऽवतु ।
निशान्ते सर्वगः पातु, सर्वदश्चक्र - नायकः ।।१५
रणे राज - कुले द्यूते, विवादे शत्रु - सङ्कटे ।
सर्वत्र सर्वतः पातु, ऐंक्लींसौः बीज - भूषिता ।।१६

।। फल-श्रुति ।।

इतीदं कवचं दिव्यं, बालायाः सारमुत्तमम् ।
मन्त्र-विद्या-मयं तत्त्वं, मातृकाक्षर-भूषितम् ।।१
ब्रह्म - विद्या - मयं ब्रह्म-साधनं मन्त्र-साधनम् ।
यः पठेत् सततं भक्त्या, धारयेद् वा महेश्वरि ! ।।२
तस्य सर्वार्थ-सिद्धिः स्यात्, साधकस्य न संशयः ।
रवौ भूर्जे लिखित्वादौ, स्वयम्भू - कुसुमैः परं ।।३
वन्ध्यापि काक-वन्ध्यापि, मृत-वत्साऽपि पार्वति !
लभेत् पुत्रो महा-वीरो, मार्कण्डेय-समायुषः ।।४

वित्तं दरिद्रो लभते, मति-मान यशः स्त्रियम् ।
य एतद्धारयेद् वर्म, संग्रामे स रिपून् जयेत् ।।५
जित्वा वैरि-कुलं घोरं, कल्याणं गृहमाविशेत् ।
बहुनोक्तेन किं देवि ! धारयेन्मूर्ध्नि सन्ततं ।।६
इह - लोके धनारोग्यं, परमायुर्यशः श्रियम् ।
प्राप्य भक्त्या नरो भोगानन्ते याति परं पदम् ।।७
इदं रहस्यं परमं, सर्व - तन्त्रेषु ह्युत्तमं ।
गुह्याद्-गुह्यमिमं नित्यं, गोपनीयं स्व-योनि-वत् ।।८

।। श्रीरुद्र-यामले श्रीबाला-त्रिपुर-सुन्दरी
त्रैलोक्य-विजय-नाम कवचम् ।।

श्रीबाला-हृदय-स्तोत्रम्

विनियोग—ॐ अस्य श्रीबाला-देव्या हृदय-महा-मन्त्रस्य सदा-शिव ऋषिः, अनुष्टुप् छन्दः, श्रीत्रिपुर-सुन्दरी बाला देवता, वाग्भवं (ऐं) बीजं, तार्तीय (क्लीं) शक्तिः, काम - राजं (क्लीं) कीलकं, श्रीबाला-देवी-प्रीत्यर्थे पाठे विनियोगः ।

॥ ध्यान ॥

वन्दे देवीं स्थितां बालां, भास्वन्मण्डल-मध्यगां ।
चञ्चच्चन्द्राननां तप्तं, चामीकर - सम - प्रभाम् ॥१
नृत्यत्-खञ्जन-नेत्रस्य, लोकानत्यन्त-वल्लभाम् ।
मध्य-भागे लसत्काञ्ची, मणि-मुक्ता-विनिर्मिताम् ॥२
पद-विन्यस्त - हंसालीं, सुक-नासा-विराजिताम् ।
करि-शुण्डोरु-युगलां, मत्त-कोकिल-निःस्वनाम् ॥३
पुस्तकं जप - मालां च, वरदाभय - पाणिनीम् ।
कुमारी-वेश-शोभाढ्यां, कुमारी-वृन्द-मण्डिताम् ॥४
विद्रुमाधर-शोभाढ्यां, विद्रुमालि-नखालिकाम् ।
क्वणत् - काञ्चीं कलानाथ-समान-रुचिराननाम् ॥५
मृणाल-बाहु-लतिकां, नाना-रत्न-विराजिताम् ।
कर - पद्म - समानाभां, पाद-पद्म-विराजिताम् ॥६

चारु-चम्पेव - वसनां, देव - देव - नमस्कृताम् ।
चन्दनेन्दु-विलिप्ताङ्गीं, रोम-राजी-विचित्रताम् ॥७
तिल-पुष्प-समानाभां, नासा-रत्न-समन्विताम् ।
गज-गण्ड-निताम्बाभां, रम्भा-जङ्घा-विराजितां ॥८
हर-विष्णु-महेन्द्राद्यैः, पूज्यते पाद - पङ्कजाम् ।
कल्याणीं कमलां कालीं, कुञ्चिकां कमलेश्वरीं ॥९
पावनीं परमां शक्तिं, पवित्रां पावनीं शिवाम् ।
भवानीं भव - पाशघ्नीं, भीतिहां भुवनेश्वरीम् ॥१०
भवानीं भव-शक्तिं च, भेरुण्डां मुण्ड-मालिनीम् ।
जलन्धर - गिर्युत्सङ्गां, पूर्ण - गिर्यनुरागिणीम् ॥११
काम-रूपां च कामाख्यां, देवी-कोट-कृतालयाम् ।
ॐकार-पीठ-निलयां, महा - मायां महेश्वरीम् ॥१२
विश्वेश्वरीं च मथुरां, नाना-रूपा कृता-पुरीम् ।
ऐंक्लींसौः त्र्यक्षरां बालां, तद्विलोमा कुमारिकां ॥१३
ह्रौः ऐंह्सः नमो देवि ! त्रिपुरां जीव-भैरवीम् ।
नारदो चास्य देवर्षिः, महा-शान्ति-फल-प्रदाम् ॥१४
ॐ नमो श्रीमहा-लक्ष्म्यै, लक्ष्मीं त्रिपुर-भैरवीम् ।
ॐह्रींजूंसः प्राण - ग्रन्थि, द्विधार्जं-कवच-द्वयम् ॥१५
इयं सञ्जीविनी देवि ! मृतान् जीवत्व-दायिनीम् ।
फ्रेः फ्रं न फ ल व र यूं, श्रीं श्रों अमृतमावदेत् ॥१६

स्रावय स्रावय तथा, व्रीं व्रीं मृत्युञ्जयाभिधा ।
ॐ नमो प्रथमाभाष्य, काली-बीजं द्विधा पठेत् ॥१७
कूर्च-द्वयं तथा माया, आगामि - पदता वदेत् ।
मृत्युं छिन्दि तथा भिन्दि, महा-मृत्युञ्जयो भवेत् ॥१८
तव शब्दं ममाभाष्य, खड्गेन च विदारय ।
द्विधा भाष्य महेशानि ! तदन्ते वह्नि - सुन्दरी ॥१९
इयं देवि ! महा-विद्या, आगामि काल-वञ्चिनी ।
प्रातर्दीप - दलाकारं, वाग्भवं रसना - तले ॥२०
विचिन्त्य प्रजपेत् तच्च, महा-कविर्भवेद् ध्रुवम् ।
मध्याह्ने काम-राजाख्यं, जपा-कुसुम-सन्निभम् ॥२१
विचिन्त्य हृदि मध्ये तु, तच्च मन्त्रं जपेत् प्रिये !
धर्मार्थ-काम-मोक्षाणां, भाजनो जायते ध्रुवम् ॥२२
तार्तीयं चन्द्र सकात्रां, सायं-काले विचिन्त्य च ।
प्रजपेत् तच्च देवेशि ! जायते मदनोपमः ॥२३
वाग्भवं काम-राजं तु, तार्तीयं वह्नि-वल्लभाम् ।
अयुतं प्रजपेन्नित्यं, आगतं काल वञ्च्यते ॥२४
त्रिकोणं चक्रमालिख्य, माया - युक्तं महेश्वरि !
यस्योपरि लिखेत् पद्मं, मातृका-मन्त्र-गर्भितम् ॥२५
तस्योपरि समास्तीर्य, चासनं रक्त - वर्णकम् ।
तस्योपरि विशेद्देवि ! साधको प्राङ्मुखो निशि ॥२६

क्रमेण प्रजपेद् वर्णा, वागादि नियतः शुचिः ।
मण्डले त्रितये देवि ! प्राप्यते सिद्धिमुत्तमाम् ॥२७
नव-योन्यात्मकं चक्रं, पूजयेत् शास्त्र - वर्त्मना ।
प्रजपेत् त्र्यक्षरी-बालां, सर्व-सिद्धीश्वरो भवेत् ॥२८
यं यं चिन्तयते कामं, तं तं प्राप्नोति सर्वशः ।
इदं तु हृदयं देवि ! तवाग्रे कथितं मया ॥२९
मम भाग्यं च सर्वस्वं, ब्रह्मादीनां च दुर्लभम् ।
गोपनीयं त्वया भद्रे ! स्व-योनिरिव पार्वति ! ॥३०
शतावर्तेन देवेशि ! मानुषी वशमाप्नुयात् ।
सहस्रावर्तनाद् देवि ! देवानां कार्यपेक्षणात् ॥३१
लक्षमावर्तनाद् देवि ! सुनासीरस्वमासनात् ।
क्षणात् स्रवति तत्र द्वै, किं पुनः क्षुद्र - जन्तवः ॥३२
बाला - देव्या सुहृदयमज्ञात्वा यो जपेदधमः ।
निष्फला तस्य पूजा च, बाला-देवी च क्रुद्धचति ॥३३
तस्मात् सर्व-प्रयत्नेन, ज्ञात्वा देवि ! जपन्मनुम् ।
सर्व-सिद्धिमवाप्नोति, सर्वदा सुख-मान् भवेत् ॥३४

॥ श्रीजाल-सम्वर-महा-तन्त्रे त्रिपुरा-बाला-देव्या हृदयम् ॥



अष्टोत्तर-शत-नाम स्तोत्रम्

अस्य श्रीबाला-त्रिपुर-सुन्दरी अष्टोत्तर-शत-नाम स्तोत्र - मन्त्रस्य चिदानन्द ऋषिः, अनुष्टुप् छन्दः, श्रीबाला - त्रिपुर - सुन्दरी देवता, वाग् बोजं, काम शक्तिः, तार्तीयं कीलकं, मम धर्मार्थ-काम-मोक्षार्थे पाठे विनियोगः ।

ध्यानम्—

अरुण - किरण - जालैरञ्जिता सावकाशा,
विधृत-जप-वटीका पुस्तिकाभीति-हस्ता ।
इतर-कर-वराढचा, फुल्ल-कह्लार-संस्था,
निवसतु हृदि बाला, नित्य कल्याण-शीला ।।

अरुण-रूपा महा-रूपा, ज्योति-रूपा महेश्वरी ।
पावंती वर - रूपा च, पर - ब्रह्म - स्वरूपिणी ।।१
लक्ष्मी लक्ष्मि-स्वरूपा च, लक्षालक्ष-स्वरूपिणी ।
गायत्री चैव सावित्री, सन्ध्या सरस्वती श्रुती ।।२
वेद-बीजा ब्रह्म-बोजा, विश्व-बीजा कवि-प्रिया ।
इच्छा-शक्ति क्रिया-शक्ति, आतम-शक्ति भयङ्करी ।।३
कालिका कमला काली, कङ्काली काल-रूपिणी ।
उपस्थिति-स्वरूपा च, प्रलया लय - कारिणी ।।४

हिंगुला त्वरिता चण्डी, चामुण्डा मुण्ड-मालिनी ।
रेणुका भद्र-काली च, मातङ्गी शिव-शाम्भवी ।।५

योगुला मङ्गला गौरी, गिरिजा गोमती गया ।
कामाक्षी काम-रूपा च, कामिनी काम-रूपिणी ।।६

योगिनी योग - रूपा च, योग-ज्ञान-शिव-प्रिया ।
उमा कात्यायनी चण्डयम्बिका त्रिपुर-सुन्दरी ।।७

अरुणा तरुणी शान्ता, सर्व - सिद्धि सुमङ्गला ।
शिवा च सिद्धि-माता च, सिद्धि-विद्या हरि-प्रिया ।।८

पद्मावती पद्म - वर्णा, पद्माक्षी पद्म - सम्भवा ।
धारिणी धरित्री धात्री, अगम्या गम्य-वासिनी ।।९

विद्यावती मन्त्र-शक्तिः, मन्त्र-सिद्धि-परायणी ।
विराट्-धारिणी विधात्री, वाराही विश्व-रूपिणी ।।१०

परा पश्याऽपरा मध्या, दिव्य-वाद-विलासिनी ।
नाद - बिन्दु - कला - ज्योतिर्विजया भुवनेश्वरी ।।११

ऐं-कारिणी भयङ्कारी, क्लींकारी कमल-प्रिया ।
सौङ्कारी शिव-पत्नी च, पर-तत्त्व-प्रकाशिनी ।।१२

ह्रीङ्कारी आदि-माया च, यन्त्र-मूर्ति-परायणी ।
बाला-त्रिपुर-सुन्दर्याः, नाम अष्टोत्तर - शतम् ।।१३

।। फल-श्रुति ।।

प्रातः - काले पठेन्नित्यं, सर्व-सम्पत्ति-दायकम् ।
द्वि - काले पठेन्नित्यं, भुक्ति-मुक्ति-प्रदायकम् ।।१
त्रि-काले पठेन्नित्यं, सर्व - सिद्धि - प्रदायकम् ।
अष्टोत्तर - सहस्रेण, लभते वाञ्छितं फलम् ।।२
आयुरारोग्यमैश्वर्यं, ज्ञान - वित्तं यशो-बलम् ।
अष्टोत्तर-शतं दिव्यं, नाम-स्तोत्रं प्रकीर्तितम् ।।३

।। श्रीबाला-त्रिपुर-सुन्दरी अष्टोत्तर-शत-नाम-स्तोत्रं ।।



दुःस्वप्न-नाशकं कवचम्

ॐ अस्य श्रीबाला परमेश्वरी कवच - मन्त्रस्य श्रीमहा - देव ऋषिः । ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः पंक्तिश्छन्दः । ऐं क्लीं सौः श्रीबाला परमेश्वरी देवता । मम चतुर्वर्ग-फल-प्राप्त्यर्थं सर्व-विघ्न-निवारणार्थे जपे विनियोगः ।

षडङ्ग-न्यास—

	कर-न्यास	**अङ्ग-न्यास**
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सौः	मध्यमाभ्यां वषट्	शिखायै वषट्
ऐं	अनामिकाभ्यां हुं	कवचाय हुं
क्लीं	कनिष्ठाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सौः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यानम्—

बालार्क - मण्डलाभासां, चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुश - वराभीतिं, धारयन्तीं शिवां भजे ।।

प्राणायामं च विधाय । ॐ नमः—

पूर्वस्यां भैरवी पातु, बाला मां पातु दक्षिणे ।
मालिनी पश्चिमे पातु, वासिनी चोत्तरेऽवतु ।।

ऊर्ध्वं पातु महा - देवी, श्रीबाला त्रिपुरेश्वरी ।
अधस्तात् पातु देवेशी, पातालातल - वासिनी ।।
आधारे वाग्भवं पातु, काम - राजस्तथा हृदि ।
महा - विद्या भगवती, पातु मां परमेश्वरी ।।
ऐंलं ललाटे मां पायात्, ह्रौंह्रीं हंसश्च नेत्रयोः ।
नासिका कर्णयोः पातु, ह्रीं ह्रौं चिबुके तथा ।।
सौः पातु च गले मे, हृदि ह्रीं, ह्रः नाभि-देशके ।
सौःक्लींश्रीं गुह्य-देशे तु, ऐंह्रौं पातु च पादयोः ।।
ह्रीं मां सर्वतश्च पातु, सौः पायात् पद-सन्धिषु ।
जले स्थले तथा कोशे, देव - राज - गृहे तथा ।।
क्षैंक्षें मां त्वरिता पातु, मां चक्री सौः मनोभवा ।
हंसौः पायात् महा - देवी, परं निष्कल-देवता ।।
विजया मङ्गला दूती, कल्पा मां भग-मालिनी ।
ज्वाला-मालिनी नित्या च, सर्वदा पातु मां शिवा ।।

।। फल-श्रुति ।।

इतीदं कवचं देवि ! देवानामपि दुर्लभम् ।
तव प्रीत्या समाख्यातं, गोपनीयं प्रयत्नतः ।।
इदं रहस्यं परमं, गुह्याद् गुह्य - तरं प्रिये !
धन्यं प्रशस्यमायुष्यं, भोग - मोक्ष - प्रदं शिवम् ।।

दुःस्वप्न-नाशनं पुंसां, नर-नारी-वशं करम् ।
आकर्षण-करं देवि ! स्तम्भ-मोह-करं शिवे ! ।।
इदं कवचमज्ञात्वा, श्रीबाला - त्रिपुरेश्वरीम् ।
यो जपेत् योगिनी-वृन्दैः, स भक्ष्यो नात्र संशयः ।।
न तस्य मन्त्र-सिद्धिः स्यात्, कदाचिदपि शङ्करि !
इह लोके स दारिद्र्यं, दुःख-रोग-भयानि च ।।
भुक्त्वा निरयं च गत्वा, पशु-योनिमवाप्नुयात् ।
तस्मादेतत् सदाऽभ्यासादधिकारी भवेत् ततः ।।
मत् - पूर्वं निर्मितमिदं कवचं स-पुण्यम्,
पूजा - विधेश्च पुरतो यदि वाऽपरेण ।
रात्रौ च भोग-ललितानि सुखानि भुक्त्वा,
देव्याः पदं व्रजति तत् पुनरन्त-काले ।।

।। कुलार्णव-संहितायां दुःस्वप्न-नाशकं श्रीबाला-कवचम् ।।

मा दश-मयी बाला स्तोत्रम्

श्रीकाली वगलामुखी च ललिता धूम्रावती भैरवी ।
मातङ्गी भुवनेश्वरी च कमला श्रीवज्र - वैरोचनी ।।
तारा पूर्व-महा-पदेन कथिता विद्या स्वयं शम्भुना ।
लीला-रूप-मयी च देश-दशधा बाला तु मां पातु सा ।।

श्यामां श्याम-घनावभास-रुचिरां नीलालकालंकृताम् ।
बिम्बोष्ठीं बलि-शत्रु-वन्दित-पदां बालार्क-कोटि-प्रभां ।।
त्रास-त्राण-कृपाण-मुण्ड-दधतीं भक्ताय दानोद्यताम् ।
वन्दे सङ्कट-नाशिनीं भगवतीं बालां स्वयं कालिकाम् ।।

ब्रह्मास्त्रां सुमुखीं बकार-विभवां बालां बलाकी-निभां ।
हस्त-न्यस्त-समस्त वैरि - रसनामन्ये दधानां गदाम् ।।
पीतां भूषण-गन्ध-माल्य-रुचिरां पीताम्बराङ्गां वराम् ।
वन्दे सङ्कट-नाशिनीं भगवतीं बालां च बगलामुखीम् ।।

बालार्क-श्रुति-भास्करां त्रिनयनां मन्द-स्मितां सन्मुखीं ।
वामे पाश - धनुर्धरां सु-विभवां वाणं तथा दक्षिणे ।।
पारावार-विहारिणीं पर-मयीं पद्मासने संस्थिताम् ।
वन्दे सङ्कट-नाशिनीं भगवतीं बालां स्वयं षोडशीम् ।।

दीर्घां दीर्घ-कुचामुदग्र-दशनां दुष्टच्छिदां देवताम् ।
क्रव्यादां कुटिलेक्षणां च कुटिलां काक-ध्वजां क्षुत्कृशां ।।
देवीं सूर्प-करां मलीन-वसनां तां पिप्पलादार्चिताम् ।
बालां सङ्कट-नाशिनीं भगवतीं ध्यायामि धूमावतीम् ।।

उद्यत्-कोटि-दिवाकर-प्रतिभटां बालार्कभा-कर्पटाम् ।
माला-पुस्तक-पाशमंकुश-धरां दैत्येन्द्र-मुण्ड - स्रजाम् ।।
पीनोत्तुङ्ग-पयोधरां त्रि-नयनां ब्रह्मादिभिः संस्तुताम् ।
बालां सङ्कट - नाशिनीं भगवतीं श्रीभैरवीं धीमहि ।।

वीणा-वादन-तत्परां त्रि-नयनां मन्द-स्मितां सन्मुखीम् ।
वामे पाश - धनुर्धरां तु निकरे बाणं तथा दक्षिणे ।।
पारावार-विहारिणीं पर-मयीं ब्रह्मासने संस्थिताम् ।
वन्दे सङ्कट-नाशिनीं भगवतीं मातङ्गिनीं बालिकाम् ।।

उद्यत्-सूर्य-निभां च इन्दु-मुकुटामिन्दीवरे संस्थिताम् ।
हस्ते चारु - वराभयं च दधतीं पाशं तथा चांकुशम् ।।
चित्रालंकृत-मस्तकां त्रि-नयनां ब्रह्मादिभिः सेविताम् ।
वन्दे सङ्कट-नाशिनीं च भुवनेशीमादि - बालां भजे ।।

देवीं काञ्चन-सन्निभां त्रि-नयनां फुल्लारविन्द-स्थिताम् ।
विभ्राणां वरमब्ज-युग्ममभयं हस्तैः किरीटोज्ज्वलाम् ।।
प्रालेयाचल-सन्निभैश्च करिभिराषिञ्च्यमानां सदा ।
बालां सङ्कट-नाशिनीं भगवतीं लक्ष्मीं भजे चेन्दिराम् ।।

सच्छिन्नां स्व-शिरो-विकीर्ण-कुटिलां वामे करे बिभ्रतीं ।
तृप्तास्य-स्व-शरीरजैश्च रुधिरैः सन्तर्पयन्तीं सखीम् ।
सद्-भक्ताय वर-प्रदान-निरतां प्रेतासनाध्यासिनीम् ।
बालां सङ्कट-नाशिनीं भगवतीं श्रीछिन्न-मस्तां भजे ।

उग्रामेक-जटामनन्त - सुखदां दूर्वा - दलाभामजाम् ।
कर्त्रीं-खड्ग-कपाल-नील-कमलान् हस्तैर्वहन्तीं शिवां ।
कण्ठे मुण्ड-स्रजां कराल-वदनां कञ्जासने संस्थिताम् ।
वन्दे सङ्कट-नाशिनीं भगवतीं बालां स्वयं तारिणीम् ।

मुखे श्रीमातङ्गी तदनु किल तारा च नयने ।
तदन्तरगा काली भृकुटि - सदने भैरवि परा
कटौ छिन्ना धूमावती जय कुचेन्दी कमलजा ।
पदांशे ब्रह्मास्त्रा जयति किल बाला दश - मयी

विराजन् मन्दार - द्रुम - कुसुम - हारस्तन - तटो
परित्रास - त्राणा स्फटिक - गुटिका पुस्तक - वरा
गले रेखास्तिस्रो गमक - गति - गीतैक - निपुणा
सदा पीता हाला जयति किल बाला दश - मयी

॥ मेरु-तन्त्रे श्रीदश-मयी बाला त्रिपुर--सुन्दरी स्तोत्रम् ॥

श्रीबाला खड्ग-माला स्तोत्रम्

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः नमः बाला - त्रिपुर-सुन्दर्यै । हृदय-देवि शिरो-देवि शिखा-देवि कवच-देवि नेत्र-देवि अस्त्र-देवि !

दिव्यौघाख्य-गुरु-रूपिणि प्रकाशानन्द-मयि परमेशानन्द-मयि पर-शिवानन्द - मयि कामेश्वरानन्द-मयि मोक्षानन्द-मयि कामानन्द - मयि अमृतानन्द - मयि; सिद्धौघाख्य - गुरु - रूपिणि ईशान-मयि तत्पुरुष-मयि अघोर - मयि वाम - देव - मयि सद्योजात-मयि; मानवौघाख्य-गुरु-रूपिणि गगनानन्द-मयि विश्वानन्द-मयि विमलानन्द - मयि मदनानन्द - मयि आत्मानन्द-मयि प्रियानन्द-मयि !

गुरु - चतुष्टय - रूपिणि गुरु-मयि परम-गुरु-मयि परात्पर-गुरु-मयि परमेष्ठि-गुरु-मयि !

सर्वज्ञे नित्य-तृप्ते अनादि-बोधे स्वतन्त्रे नित्यमलुप्ते रति - मयि प्रीति-मयि मनोभवा-मयि; सर्व-संक्षोभण-बाण - मयि सर्व-विद्रावण-बाण-मयि सर्वाकर्षण-बाण-मयि वशीकरण-बाण-मयि उन्मादन-बाण-मयि !

काम-मयि मन्मथ-मयि कन्दर्प-मयि मकर-ध्वज-मयि मनोभव-मयि; सुभगा-मयि भगा-मयि भग-सर्पिणी-मयि भग-माला-मयि अनङ्गा-मयि अनङ्ग-कुसुमा-मयि अनङ्ग-मेखला-मयि अनङ्ग-मदना-मयि !

ब्राह्मी-मयि माहेश्वरी-मयि कौमारी-मयि वैष्णवी-मयि वाराही-मयि इन्द्राणी-मयि चामुण्डा-मयि महा-लक्ष्मी-मयि !

असिताङ्ग-मयि रुरु-मयि चण्ड-मयि क्रोध-मयि उन्मत्त-मयि कपाल-मयि भीषण-मयि संहार-मयि !

कामरूप-पीठ-मयि मलय-पीठ-मयि कुल-नाग-गिरि-पीठ-मयि कुलान्तक-पीठ-मयि चौहार-पीठ-मयि जालन्धर-पीठ-मयि उड्यान-पीठ-मयि देवी-कोट-पीठ-मयि !

हेतुक-मयि त्रिपुरान्तक-मयि वेताल-मयि अग्नि-जिह्व-मयि कालान्तक-मयि कपाल-मयि एक-पाद-मयि भीम-रूप-मयि निऋत-मयि हाटकेश्वर-मयि !

इन्द्र-मयि अग्नि-मयि यम-मयि निऋत-मयि वरुण-मयि वायु-मयि कुबेर-मयि ईशान-मयि ब्रह्मा-मयि अनन्त-मयि !

(शेष पृष्ठ २३ पर

श्रीबाला माला-मन्त्रम्

प्रथमे मूलेन ऋष्यादि-न्यासः ।

ध्यानम्—

ऐङ्कारानन-गर्वितानल-शिखां सौःक्लींकलां विभ्रतीम्,
सौवर्णाम्बर-धारिणीं वर-सुधा-धौतानुरागां शिवाम् ।
वन्दे पुस्तक-पाशमंकुश-जपां स्रग् - भूषितोपृत्कराम्,
तां बालां त्रिपुरां पद-त्रय-मयीं षट्-चक्र-सञ्चारिणीम् ।।

ॐ नमो भगवति, बाला-त्रिपुर-सुन्दरि, अयुत-कोटि-रुद्र - गण - सेविते, लक्ष-कोटि-विष्णु-गण-सेविते, अनेक-कोटि-ब्रह्म-गण-सेविते, प्रतापिनि ! ज्वल ज्वल, प्रज्वल प्रज्वल, मम शत्रु-मित्र-कलत्र-बन्धूनां ध्वंसं कुरु कुरु, चट चट, प्रचट प्रचट, तनु तनु, पश्चिम - दिशं

(पृष्ठ २२ का शेष)

वज्र-मयि शक्ति-मयि दण्ड-मयि खड्ग-मयि पाश-मयि अंकुश - मयि गदा - मयि त्रिशूल-मयि पद्म-मयि चक्र-मयि !

श्रीं श्रीबाला - त्रिपुर- सुन्दरि सर्वानन्द - मयि ! नमस्ते नमस्ते नमस्ते स्वाहा सौः क्लीं ऐं ।

।। श्रीबाला-त्रिपुर-सुन्दर्याः खड्ग-माला शुभं भूयात् ।।

ध्वंसय ध्वंसय, उत्तर - दिशं रोधय रोधय, पूर्व - दिशं संहारय संहारय, दक्षिण-दिशं बन्धय बन्धय, भूत-प्रेत-पिशाच-ब्रह्म-राक्षसादि-सकल - देवता - प्रयोगान् छेदय छेदय, सकल-मूषकादि-प्रयोगान् मारय मारय, छेदय छेदय, सकल-विषं नाशय नाशय ।

महा-त्रिपुर-भैरवि, चतुर्दश - विद्या - प्रबोधिनि, अनेक-कोटि-ऋषि-गण-सेविते, लक्ष-कोटि - रवि - गण-सेविते, अग्नि-तेजो-रूप-धारिणि, नव-कोटि-शक्ति-गण-सेविते, आनन्द - रूपिणि ! ममाभयं देहि देहि, सर्व-वादि-प्रतिवादीनां मम वश्यं कुरु कुरु, मम पुत्र-मित्र-कलत्र-बन्धूनां रक्षां कुरु कुरु, सकल-कामनां कुरु कुरु, आंह्रींक्रों श्रींह्रींक्लीं ऐंक्लींसौः सौःक्लीऐं क्लींह्रींश्रीं ह्रांह्रींह्रूं हुं ऐंक्लींसौः हुं फट् ।

ह्रीङ्कार-विजृम्भित-महा-कुण्डलिनी—स्वरूपिणि ! सकल-कामिनीनां मम वश्यं कुरु कुरु, सकल-दुराचार-पुरुषान् हन हन, भक्षय भक्षय, सकल - राज्ञो राज-पुरुषान् मम वश्यं कुरु कुरु, ह्रांह्रींह्रूं ह्रौंह्रौंह्रः फट् स्वाहा ।

॥ श्रीबाला-त्रिपुर-सुन्दर्याः माला-मन्त्रं शुभं भूयात् ॥

श्रीबाला कर्पूर स्तोत्रम्

(१)

कर्पूरामिन्दु-गौरां शशि-सकल-धरां रक्त-पद्मासनस्थाम्,
विद्या-पात्राक्ष-मुद्रा-धृत-करकमलां त्वां स्मरन्सन् त्रिलक्षं ।
जप्त्वा चन्द्रार्द्ध-भूषं सु - रुचिरमधरं बीजमाद्यं तवेदम्,
हुत्वा पश्चाद्पलाशैः स भवति कविराड् देवि बाले महेशि !

(२)

हस्ताब्जैः पात्र-पाशांकुश-कुसुक-धनुर्बीज-पूरान् दधानां,
रक्तां त्वां संस्मरन्सन् प्रजापति मनुजो यस्त्रिलक्षं भवानि !
वामाक्षी चन्द्र-संस्थं क्षिति-सहित-विधि काम-बीजं तवेदं,
चन्द्रैर्हुत्वा दशांशं स नयति सकलान् वश्यतां सर्वदैव ।।

(३)

विद्याक्षाज्ञान-मुद्राऽमृत-कलश-धरां त्वां मनोज्ञां किशोरीं,
स्मेरां ध्यायन्त्रिनेत्रां शशधर-धवलां यो जपेद् वै त्रिलक्षं ।
जीवं सङ्कर्षणाढ्यं तव सुर-नमिते ! सर्ग-युक्तं सु-बीजम्,
हुत्वान्ते मालतीभिर्भवति स ललिते श्रीयुतो भोगवांश्च ।।

(४)

ध्यायन् त्वां पुस्तकाक्षाभय-वरद-करां लोहितामां कुमारीं,
कश्चिद्यः साधकेन्द्रो जपति कुल-विधौ प्रत्यहं षट्-सहस्रं ।

मातर्वाङ्-मार - शक्ति - प्रयुत - मनुमिमं त्र्यक्षरं त्रैपुरं ते,
भुक्त्वा भोगाननेकान् जननि स लभतेऽवश्यमेवाष्टसिद्धीः ।

(५)

आरक्तां कान्त-दोर्भ्यां मणि-चषकमथो रत्न-पद्मं दधानां,
वाङ्-माया-श्री-युतान्यं मनु-मयि ललिते तत्त्वलक्षं जपेद्यः ।
ध्यायन् रूपं त्वदीयं तदनु च हवनं पायसान्नैः,
प्रकुर्याद्योगीशो तत्त्ववेत्ता परशिवमहिले भूतले जायते सः ।

(६)

वाणी चेटी रमा वाग्भवमथ मदनो शक्ति - बीजं च,
षड्भिरेतैश्चन्द्रार्द्ध-चूडे भवति तव महामंत्रराजो षडर्णः ।
जप्त्वैनं साधको यः स्मर-हर-दयिते भक्तितस्त्वामुपास्ते,
विद्यैश्वर्याणि भुक्त्वा तदनु स लभते दिव्य-सायुज्यमुक्तिं ।।

(७)

महा - विन्दुः शुद्धो जननि ! नव-योन्यन्तर - गतो,
भवेदेतद्-बाह्ये वसु - छदन - पद्मं सु - रुचिरम् ।
ततो वेद - द्वारं भवति तव यन्त्रं गिरि - सुते,
तदस्मिन् त्वां ध्यायेत् क हरि-हर-रुद्रेश्वर-पदाम् ।।

(८)

नवीनादित्याभां त्रि - नयन - युतां स्मेर - वदनाम्,
महाऽक्ष-स्रग - विद्याऽभय - वर-करां रक्त-वसनाम् ।

किशोरीं त्वां ध्यायन् निज-हृदय-पद्मे पर - शिवे,
जपेन् मोक्षाप्त्यर्थं तदनु-जुहुयात् किंशु - कुसुमैः ।।

(९)

हृदम्भोजे ध्यायन् कनक - सदृशामिन्दु - मुकुटाम्,
त्रि-नेत्रां स्मेरास्यां कमल-मधु-लुङ्गाङ्कित-कराम् ।
जपेद् दिग्-लक्षं यस्तव मनु-मयो देवि ! जुहुयात्,
सु - पक्वैर्मालूरैरतुल - धनवान् स प्रभवति ।।

(१०)

स्मरेद्धस्तैर्वेदाभय - वर - सुधा - कुम्भान् दधतीम्,
स्रवन्ती पीयूषं धवल - वसनामिन्दु - सकलाम् ।
सु-विद्याप्त्यैर्मन्त्रं तव हर - नुते ! लक्ष - नवकम्,
जपेत् त्वां कर्पूरैरगुरु - सहितैरेव जुहुयात् ।।

(११)

सहस्रारे ध्यायन् शश - धर - निभां शुभ्र - वसना—
मकारादि - क्षान्तावयव - युत - रूपां शशि-धराम् ।
जपेद् भक्त्या मन्त्रं तव रस - सहस्रं प्रति - दिनम्,
तथाऽऽरोग्याप्त्यर्थं भगवति ! गुडूच्यैः प्रजुहुयात् ।।

(१२)

कुलज्ञः कश्चिद् यो यजति कुल-पुष्पैः कुल - विधौ,
कुलागारे ध्यायन् कुल-जननि ! ते मन्मथ-कलाम् ।

षडर्णं पूर्वोक्तं जपति कुल - मन्त्रं तव शिवे,
स जीवन्मुक्त स्यादकुल - कुल - पङ्केरुह - गते ।।

(१३)

शिवे ! मद्यैर्मांसैश्चणक - वटकैर्मीन - सहितैः,
प्रकुर्वंश्चक्रार्चां सु - कुल - भग - लिङ्गामृत - रसैः ।
बलिं शङ्का - मोहादिक - पशु - गणान्यो विदधति,
त्रिकालज्ञो ज्ञानी स भवति महा - भैरव - समः ।।

(१४)

मनो-वाचाऽगम्यामकुल-कुल-गम्यां पर - शिवाम्,
स्तवीमि त्वां मातः ! कथमहमहो ! देवि ! जड-धीः ।
तथापि त्वद्-भक्तिर्मुखरयति मां तद् - विरचितम्,
स्तवं क्षन्तव्यं मे त्रिपुर - ललिते ! दोषमधुना ।।

(१५)

अनुष्ठान - ध्यानार्चनमनु समुद्धारण - युतम्,
शिवे ! ते कर्पूर - स्तवमिति पठेदर्चन - परः ।
स योगी भोगी स्यात् स हि निखिल-शास्त्रेषु निपुणः,
यमोऽन्यो वैरीणां विलसति सदा कल्प-तरु-वत् ।।

(१६)

बालां बाल-दिवाकर-द्युति-निभां पद्मासने संस्थितां,
पञ्च-प्रेत-मयाम्बुजासन-गतां वाग्वादिनी-रूपिणीम् ।
चन्द्रार्कानल-भूषित-त्रिनयनां चन्द्रावतंसान्विताम्,
विद्याक्षाभय-विभ्रतीं वर-करां वन्दे परामम्बिकाम् ।।

।। श्रीपरा-तन्त्रे श्रीबाला-त्रिपुर-सुन्दरी-कर्पूर-स्तोत्रम् ।।

श्रीबाला-सहस्राक्षरी-स्तोत्रम्

ऐं नमः श्रीबालायै । ऐं नमो बालायै, त्रिगुण-रहितायै, क्लीं शिवा-रूपिण्यै, शिवोर्ध्व-गतायै, त्रि-मात्रायै, सौः सर्व-देवाधि-देवीश्वर्यै, ऐं खं ऐं खं ऐं खं फट् । ॐ क्लीं ॐ क्लीं ॐ क्लीं ॐ फट् । हंसः सौः हंसः हंसः सौः फट् । ह्रां ह्रीं ह्रूं ऊर्ध्वाम्नायेश्वर्यै, ख्फ्रें ह्फ्रें स्फ्रें ह्रीं ह्रूं ह्रौं ह्रौं फट् । त्रीं ध्रीं प्रीं फ्रीं त्रैलोक्य-विजयेश्वर्यै, महा-प्रकाशायै स्वाहा—शताक्षरी ।

ऐं ह्रीं ख्फ्रें ह्फ्रें ह्स्ख्फ्रें । ॐ ह्रूं क्लीं क्रीं रां रीं रूं सौः । ॐकार-रूपिण्यै, ऐङ्कार-संस्थितायै, हंसः सोहं परमात्मा जगन्मयो । यज्ञ - रूपिण्यै, जनानन्द-दायिन्यै, त्रि-जगताधीश्वर्यै । ह्रीं ह्रीं ह्रीं, फट् फट् फट् । शत्रु-नाशिन्यै, जय-प्रदायै, त्रि-विद्या - चक्रेश्वर्यै, नर-मुण्ड-माला-धारिण्यै । नर-चर्माविगुण्ठनि, नरास्थि-हारिण्यै, महा-देवासनि, संसारार्णव - तारिणि ! मम शत्रुं भञ्जय भञ्जय, तुरु तुरु, मुरु मुरु, हिरि हिरि, मनोरथं पूरय पूरय, ममाधि - व्याधिं नाशय नाशय, छिन्धि छिन्धि, भिन्दि भिन्दि । कुरु-कुल्ले ! सर्वारिष्टं

विनाशय विनाशय, हेरि हेरि, गेरि गेरि, त्रासय त्रासय, मम रिपून् भ्रामय भ्रामय, खड्गेन खण्डं खण्डं कुरु कुरु । इषुना मर्म भेदय भेदय, ऐं खूँ खूँ खूँ खूँ खूः । रक्त-वर्ण-शरीरे, महा-घोर-रावे, शर-वाण-हस्ते, वराभयाङ्कित - चारु - हस्ते ! हूं हूं हूं फट् । चतुर्दश-भुवन-मालिनि, चतुर्दश-विद्याधीश्वरि, चतुर्वेदाध्यायिनि, चातुर्वर्ण्य-एकाकार-कारिणि, कान्ति-दायिनि, महा-घोर-घोर-तरे, अघोरामुखि, अघोर-मूर्ध्नि-संस्थिते, परापर-पर-ब्रह्माधिरूढिनि ! ह्रीं ह्रीं क्षीं फट् । ॐ ऐं ॐ क्लीं ॐ सौः । श्रीं ऐं ऐं ऐं हसैं स्हैं ॐ ह्रः कफट् । पञ्च-प्रेतासने महा-मोक्ष-दात्री । ॐ हूं फट्, ह्रः फट्, छ्रां छ्रीं छ्रीं ॐ । जगद्-योनि-रूपे, योनि-सर्पि-विभूषिणि, योनि-सृक्-शिर-भूषिणि, योनि-मालिनि, योनि-सङ्कोचिनि, योनि-मध्य-गते । द्रां द्रीं द्रूं क्षौं ह्रः फट्, क्षां यां रां लां वां शां हां ॐ ।

ॐ फट्, ऐं हूं फट्, क्लीं हूं फट्, सौः हूं फट् । श्मशान-वासिनि, श्मशान-भस्म-लेपिनि, श्मशानाङ्गार-निलये, शवारूढे, शव-मांस-भक्ष-महा-प्रिये, शव-परित-व्याप्ति-हाहा-शब्दाति-प्रिये, डामरि, भूतिनि, योगिनि, डाकिनि, राक्षसि, सह-विहारिणि, परा-प्रासाद-गेहिनि,

भस्मीलेप - कार - विभूषिते ! फ्रं ख्फ्रें ह्स्फ्रें ह्स्व्फ्रें सह्ख्फ्रें गां गीं गूं सः फट्, क्म्रीं च्म्रीं ट्म्रीं ह्म्रीं क्ष्म्रीं फट् । गिरि-निवासिनि, गिरि-पुष्प-संशोभिनि, गिरि-पुत्रि, गिरि-धारिणि, गीत - वाद्य - विमोहिनि, त्रैलोक्य-मोहिनि, देवि, दिव्याङ्ग-वस्त्र-धारिणि, दिव्य-ज्ञान-प्रदे, दिविषद्-मातः, सिद्धि-प्रदे, सिद्धि - स्वरूपे, सिद्धि-विद्योतातीतातीते, ख-मार्ग-प्रचारिणि, खगेश्वरि, खड्ग-हस्तिनि, खं-बीज-मध्य-गते ! ॐ ऐं ॐ ह्रीं ॐ श्रीं ॐ फट्, तां तीं तूं तैं तौं तः, हां हीं हूं हैं हौं हः, वां वीं वूं वैं वौं वः, च्फ्रें ह्फ्रें क्ष्प्रें अ कं चं टं तं पं यं शं । मातृका-चक्र-चक्रे, हासिनि ! ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, श्लीं हूं फट्, अं आं ऐं, इं ईं ऐं, उं ऊं ऐं, ऋं ॠं ऐं, ऐं ऐं ऐं, ओं औं ऐं, अं अः ऐं फट् । निर्वाण-रूपे, निर्वाणातीते, निर्वाण-दात्रि, निरंकुशिनि, निराकारे, निरञ्जनावतारिणि, षट् - चक्रेश्वरि, सह-स्रात्मे, महा-सूक्ष्म-सूक्ष्मे, सूक्ष्मातीत-सूक्ष्म-नाम-रूपिणि, महा - प्रलयान्त - एक - शेषाक्षिणि, संसाराब्धि-दुःख-तारिके, सृष्टि-स्थित्यन्त-कारिके, क्मांलांवुंयूं ग्मांलां-वुंयूं स्मौंलांवुंयूं क्ष्मांलांवुंयूं, ह्रीं धं छिधि, सुबुद्धिं दद दद, मोक्ष-मार्गं दर्शय दर्शय, तवानुचरं कुरु कुरु, हिरि

हिरि, धिमि धिमि धिमि । महा-डमरु-वादन-महा-
प्रिये ! आं हूं हूं हूं हूं फट् । मम हृदये तिष्ठ तिष्ठ
सुफलं देहि देहि ।४७। सर्व-तीर्थ-फलं प्रदापय प्रदापय
सर्व-दान-फलं प्रापय प्रापय । ज्योति-स्वरूपिणि ! सर्व-
योग-फलं कुरु कुरु, स्फ्रों क्रों ह्रीं ऐं क्लीं सौः स्वाहा ।
श्रीमद्-बालायै स्वाहा ।

।। बालार्णवे श्रीबाला-देव्याः सहस्राक्षरी-स्तोत्रं सम्पूर्णम् ।।



श्रीबाला-सहस्र-नामकम्

॥ पूर्व-पीठिका ॥

समाध्युपरतं काले, कदाचिद् विजने मुदा ।
परमानन्द-सन्दोहमुदितं प्राह पार्वती ॥१

॥ श्रीदेव्युवाच ॥

श्रीमन्नाथ ! तवानन्द - कारणं ब्रूहि शङ्कर !
योगीन्द्र-प्राप्यं देवीश ! प्रेम-पूर्णं सुधा-निधे !॥
कृपया यदि मे शम्भो ! सु-गोप्यमपि कथ्यताम् ॥२

॥ श्रीभैरव उवाच ॥

निर्भरानन्द-सन्दोहः, शक्ति - भावेन जायते ।
लावण्य-सिन्धुस्तत्रास्ति, बालाया रस-कन्दरः ॥३
तामेवानुक्षणं देवीं, चिन्तयामि ततः शिवाम् ।
तस्या नाम-सहस्राणि, कथयामि तव प्रिये ! ॥४
सुगोप्यान्यपि रम्भोरु, गम्भीर-स्नेह-विभ्रमात् ।
तामेव स्तुवतो देवि ! ध्यायतोऽनुक्षणं मम ।
सुख-सन्दोह-सम्भावो, ज्ञानानन्दस्य कारणम् ॥५

विनियोग—अस्य श्रीबाला-त्रिपुरसुन्दरी-सहस्र-नाम-स्तोत्रस्य भार्गव ऋषिः, अनुष्टुप् छन्दः, श्रीबाला-

त्रिपुरा देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकम्, समस्त-पुरुषार्थे समन्वय-सामर्थ्ये पाठे विनियोगः ।

ऋष्यादि-न्यास—भार्गव - ऋषये नमः शिरसि । अनुष्टुप्-छन्दसे नमः मुखे । श्रीबाला-त्रिपुरा-देवतायै नमः हृदि । ऐं बीजाय नमः गुह्ये । सौः शक्तये नमः पादयोः । क्लीं कीलकाय नमः नाभौ । समस्त-पुरुषार्थे समन्वय-सामर्थ्ये पाठे विनियोगाय नमः सर्वाङ्गेषु ।

	कर-न्यास	अङ्ग-न्यास
ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
क्लीं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
सौः	मध्यमाभ्यां वषट्	शिखायै वषट्
ऐं	अनामिकाभ्यां हुं	कवचाय हुं
क्लीं	कनिष्ठाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
सौः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

॥ ध्यान ॥

रक्ताम्बरां चन्द्र-कलावतंसाम्,
समुद्यदादित्य-निभां त्रिनेत्राम् ।
विद्याक्ष-मालाऽभय-दान-हस्ताम्,
ध्यायामि बालामरुणाम्बुजस्थाम् ॥

।। मूल-पाठ ।।

आनन्द-सिन्धुरानन्दाऽऽनन्द-मूर्ति - विनोदिनी ।
त्रिपुरा-सुन्दरी प्रेम-पाथो-निधिरनुत्तमा ।।१
वामार्ध-गह्वरा भूतिर्विभूतिः शाङ्करी शिवा ।
शृङ्गार - मूर्तिर्वरदा, रसा च शुभ-गोचरा ।।२
परमानन्द - लहरी, रती रङ्ग-वती गतिः ।
रङ्ग-मालाऽनङ्ग-कला, केलिः कैवल्यदा कला ।।३
रस-कल्पा कल्प-लता, कुतूहल-वती गतिः ।
विनोद-दिग्धा सु-स्निग्धा, मुग्ध-मूर्तिर्मनोरमा ।।४
बालार्क-कोटि-किरणा, चन्द्र-कोटि-सुशीतला ।
द्रवत्-पीयूष-दिग्धाङ्गी, स्वर्गार्थ-परि-कल्पिता ।।५
कुरङ्ग-नयना कान्ता, सु-गतिः सुख-सन्ततिः ।
राज-राजेश्वरो राज्ञी, महेन्द्र-परि-वन्दिता ।।६
प्रपञ्च-गतिरीशानी, प्रपञ्च-गतिरुत्तमा ।
दुर्वासा दुःसहा शक्तिः, शिञ्जत्-कनक-नूपुरा ।।७
मेरु-मन्दर-वक्षोजा, सृणि - पाश-वरायुधा ।
शर-कोदण्ड-संसक्त-पाणि-द्वय - विराजिता ।।८
चन्द्र-बिम्बानना चारु-मुकुटोत्तंस-चन्द्रिका ।
सिन्दूर-तिलका चारु-धम्मिल्लामल-मालिका ।।९

मन्दार-दाममुदिता, रत्न-माला - विभूषिता ।
सुवर्णाभरण-प्रीता, मुक्ता - धाम-मनोरमा ॥१०
ताम्बूल-पूर्ण-वदना, मदनानन्द-मानसा ।
सुखाराध्या तपः-सारा, कृपापारा विधीश्वरी ॥११
वक्षःस्थल-लसद्-रत्न-प्रभा मधु - रसोन्मदा ।
बिन्दु-नादात्मकोच्चार-रहिता तुर्य - रूपिणी ॥१२
कमनीयाकृतिर्धन्या, शाङ्करी प्रीति-मञ्जरी ।
प्रपञ्चा पञ्चमी पूर्णा, पूर्ण-पीठ-निवासिनी ॥१३
राज्य-लक्ष्मीश्च श्रीलक्ष्मीर्महा-लक्ष्मीः सु-राजिका ।
सन्तोष-सीमा सम्पत्तिः, शातकौम्भी तथा द्युतिः ॥१४
परि - पूर्णा जगद्धात्री, विधात्री बल-वर्धिनी ।
सार्वभौम-नृप-श्रीश्च, साम्राज्य-गतिरम्बिका ॥१५
सरोजाक्षी दीर्घ-दृष्टिः, साचीक्षण-विचक्षणा ।
रङ्ग-स्रवन्ती रसिका, प्रधाना रस-रूपिणी ॥१६
रस-सिन्धुः सु-गात्री च, धूसरो मैथुनोन्मुखा ।
निरन्तर-गुणासक्ता, शक्तिर्निधु-वनात्मिका ॥१७
कामाक्षा कमनीया च, कामेशी भग-मङ्गला ।
सुभगा भोगिनी भोग्या, भाग्यदा सुभगा भगा ॥१८
भग-लिङ्गानन्द-कला, भग-मध्य-निवासिनी ।
भग-रूपा भग-मयी, भग-यन्त्रा भगोत्तमा ॥१९

योनि-मुद्रा काम - कला, कुलामृत-परायणा ।
कुल-कुंडालया सूक्ष्मा, जीवात्मना लिङ्ग-रूपिणी ।।२०
मूल-क्रिया मूल-रूपा, मूलाकृति-स्वरूपिणी ।
सोत्सुका कमलानंदा, चिद्भावाऽऽत्म-गतिः शिवा ।।२१
श्वेतारुणा बिन्दु-रूपा, वेद-योनिर्ध्वनि-क्षणा ।
घण्टा-कोटि-रवा रावा, रवि-बिम्बोत्थिताऽद्भुता ।।२२
नादान्त-लीना सम्पूर्णा, पूर्णस्था बहु-रूपिका ।
भृङ्गारावा वंश-गतिर्वादित्रा मुरज-ध्वनिः ।।२३
वर्ण-माला सिद्धि-कला, षट्-चक्र-क्रम-वासिनी ।
मूल-केली-रता स्वाधिष्ठाना तुर्य-निवासिनो ।।२४
मणिपूर-स्थितिः स्निग्धा, कूर्म-चक्र-परायणा ।
अनाहत-गतिर्दीप-शिखा मणि-मयाऽऽकृतिः ।।२५
विशुद्धा शब्दा-संशुद्धा, जीव-बोध-स्थली रवा ।
आज्ञा-चक्राब्ज-संस्था च, स्फुरन्ती निपुणा त्रिवृत् ।।२६
चन्द्रिका चन्द्र-कोटि-श्रीः, सूर्य-कोटि-प्रभा-मयी ।
पद्म-रागारुणच्छाया, नित्याऽऽह्लाद-मयी प्रभा ।।२७
पान-श्रीश्च प्रियामात्या, निश्चलाऽमृत-नन्दिनी ।
कान्ताङ्ग-सङ्ग-मुदिता, सुधा-माधुर्य-सम्भृता ।।२८
महा-मञ्च-स्थिताऽलिप्ता, तृप्ता दृप्ता सुसम्भृतिः ।
स्रवत्-पीयूष-संसिक्ता, रक्तार्णव - विवर्धिनी ।।२९

सु-रक्ता प्रिय-संसिक्ता, शश्वत्-कुण्डालयाऽभया ।
श्रेयः श्रुतिश्च प्रत्येका, नव-केशि-फलावली ॥३०
प्रीता शिवा शिव-प्रिया, शाङ्करी शाम्भवी विभा ।
स्वयम्भूः स्वप्रिया स्वीया, स्वकीया जन-मातृका ॥३१
स्वारामा स्वाश्रया साध्वी, सुधाधाराऽधिकाधिका ।
मङ्गलोज्जयिनी मान्या, सर्व-मङ्गल-सङ्गिनी ॥३२
भद्रा भद्रावली कन्या, कलितार्धेन्दु-बिम्ब-भाक् ।
कल्याण-लतिका काम्या, कु-कर्मा कु-मतिर्मनुः ॥३३
कुरङ्गाक्षी क्षीब-नेत्रा, क्षारा रस-मदोन्मदा ।
वारुणी-पानमुदिता, मदिर-राचिताश्रया ॥३४
कादम्बरी-पान-रुचिर्विपाशा पाश-भीति-नुत् ।
मुदिता मुदिताऽपाङ्गा, दर-दोलित-दीर्घ-दृक् ॥३५
दैत्य-कुलानल-शिखा, मनोरथ-सुधा-द्युतिः ।
सु-वासिनो पीन-गात्री, पीन-श्रेणि-पयोधरा ॥३६
सुचारु-कवरी दन्त - दीधिति-दीप्त-मौक्तिका ।
बिम्बाधरा द्युति-मुखा, प्रवालोत्तम-दीधितिः ॥३७
तिल-प्रसून-नासाग्रा, हेम - कक्कोल-भालका ।
निष्कलङ्केन्दु-वदना, बालेन्दु - मुकुटोज्ज्वला ॥३८
नृत्यत्-खञ्जन-नेत्र-श्रोर्बिस्फुरत्-कर्ण-शष्कुली ।
बाल - चन्द्रात - पत्रार्धा, मणि-सूर्य-किरीटिनी ॥३९

हेम-माणिक्य-ताटङ्का, मणि-काञ्चन-कुण्डला ।
सुचारु - चिबुका कम्बु - कण्ठी मणि-मनोरमा ।।४०
गङ्गा-तरङ्ग-हारोर्मिमर्त्त-कोकिल - निःस्वना ।
मृणाल - विलसद् - बाहुः पाशांकुश - धनुर्धरा ।।४१
केयूर - कटकाच्छन्ना, नाना - रत्न - मनोरमा ।
ताम्र-पङ्कज - पाणि - श्रीर्नख - रत्न - प्रभावती ।।४२
अंगुलीय - मणि - श्रेणि - चञ्चदंगुलि - सन्ततिः ।
मन्दार-द्वन्द्व-सु-कचा, रोम - राजी - भुजङ्गका ।।४३
गम्भीर-नाभिस्त्रिवली-वलया च सु - मध्यमा ।
रणत्-काञ्ची-गुणोन्नद्धा, पट्टांशुक-सु-नीविका ।।४४
मेरु-गुण्डी-नितम्बाढ्या, गज-गण्डोरु-युग्म-युक् ।
सु-जानु-मन्दरासक्त - लसज्जङ्घा - द्वयान्विता ।।४५
गूढ-गुल्फा मञ्जु-शिञ्जन्मणि-नूपुर-मण्डिता ।
योगि-ध्येय-पद - द्वन्द्वा, सुधामाऽमृत - सारिणी ।।४६
लावण्य-सिन्धुः सिन्दूर-तिलका कुटिलाऽलका ।
साधु - सिद्धा सुबुद्धा च, बुधा वृन्दारकोदया ।।४७
बालार्क-किरण-श्रेणी-शोणा श्रीप्रेम-काम-धुक् ।
रस - गम्भीर - सरसी, पद्मिनी रस-सारसा ।।४८
प्रसन्नाऽऽसन्न-वरदा, शारदा च सु - भाग्यदा ।
नटराज-प्रिया विश्व - नाट्या नर्तक - नर्तकी ।।४९

विचित्र-यन्त्रा चित्तन्त्रा विद्या-वल्ली गतिः शुभा ।
कूटार-कूटा कूटस्था, पञ्च - कूटा च पञ्चमी ।।५०
चतुष्कूटा त्रि-कूटाद्या, षट्-कूटा वेद - पूजिता ।
कूट - षोडश - सम्पन्ना, तुरीया परमा कला ।।५१
षोडशी मन्त्र - यन्त्राणामीश्वरी मेरु-मण्डला ।
षोडशार्णा त्रिवर्णा च, बिन्दु-नाद - स्वरूपिणी ।।५२
वर्णातीता वर्ण-माता, शब्द - ब्रह्म-महा-सुखा ।
चैतन्य-वल्ली कूटात्मा, कामेशी स्वप्न-दृश्यगा ।।५३
स्वप्नावती बोध - करी, जागृतिर्जागराश्रया ।
स्वप्नाश्रया सुषुप्तिश्च, तन्द्रा-मुक्ता च माधवी ।।५४
लोपामुद्रा काम - राज्ञी, मानवी वित्तपार्चिता ।
शाकम्भरी नन्दि-विद्या, भास्वद्-विद्योत-मालिनी ।।५५
माहेन्द्री स्वर्ग - सम्पत्तिर्दुर्वासः सेविता श्रुतिः ।
साधकेन्द्र-गतिः साध्वी, सुलभा सिद्धि-कन्दरा ।।५६
पुर - त्रयेशी पुर - जिदर्चिता पुर - देवता ।
पुष्टिर्विघ्न-हरी भूतिर्विगुणा पूज्य - काम-धुक् ।।५७
हिरण्य - माता गणपा, गुह - माता नितम्बिनी ।
सर्व-सीमन्तिनी मोक्षा, दीक्षा दीक्षित-मातृका ।।५८
साधकाम्बा सिद्ध-माता, साधकेन्द्रा मनोरमा ।
यौवनोन्मादिनी तुङ्गा, सु - श्रोणिर्मद - मन्थरा ।।५९

पद्म - रक्तोत्पल - वती, रक्त - माल्यानुलेपना ।
रक्त-माला-रुचिः शिखा-शिखण्डिन्यति-सुन्दरी ॥६०
शिखण्डि-नृत्त-सन्तुष्टा, सौरभेयी वसुन्धरा ।
सुरभी कामदा काम्या, कमनीयार्थ-कामदा ॥६१
नन्दिनी लक्षण - वती, वसिष्ठालय - देवता ।
गो-लोक-देवी लोक - श्रीर्गो-लोक-परिपालिका ॥६२
हविर्धानी देव-माता, वृन्दारक - वरानु-युक् ।
रुद्र-पत्नी भद्र-माता, सुधा-धाराऽम्बु-विक्षतिः ॥६३
दक्षिणा यज्ञ-सम्मूर्तिः, सु-बाला धीर-नन्दिनी ।
क्षीर-पूर्णार्णव-गतिः, सुधा-योनिः सु - लोचना ॥६४
रामानुगा सु - सेव्या च, सु-गन्धालय-वासगा ।
सु-चारित्रा सु-त्रिपुरा, सु-स्तनी स्तन-वत्सला ॥६५
रजस्वला रजो-युक्ता, रञ्जिका रङ्ग-मालिका ।
रक्त-प्रिया सु-रक्ता च, रति-रङ्ग-स्वरूपिणी ॥६६
रज शुक्राम्बिका निष्ठा, रति-निष्ठा रति-स्पृहा ।
हाव-भावा काम-केलि-सर्वस्वा सुर-जीविका ॥६७
स्वयम्भू - कुसुमानन्दा, स्वयम्भू - कुसुम-प्रिया ।
स्वयम्भू-प्रीति-सन्तुष्टा, स्वयम्भू-निन्दकान्तकृत् ॥६८
स्वयम्भूस्था शक्ति-पुटी, रति-सर्वस्व-पीठिका ।
अत्यन्त-सभिका दूती, विदग्धा प्रीति-पूजिता ॥६९

कुल्लिका यन्त्र-निलया, योग-पीठाधिवासिनी ।
सु-लक्षणा रस-रूपा, सर्व - लक्षण - लक्षिता ।।७०
नानाऽलङ्कार-सुभगा, पञ्च - बाण - समर्चिता ।
ऊर्ध्व-त्रिकोण-निलया, बाला कामेश्वरी तथा ।।७१
गणाध्यक्षा कुलाध्यक्षा, लक्ष्मीश्चैव सरस्वती ।
वसन्त - समय - प्रीता, प्रीतिः कुच-भरानता ।।७२
कलाधर - मुखाऽमूर्धा, पाद - वृद्धिः कलावती ।
पुष्प - प्रिया धृतिश्चैव, रति-कण्ठी मनोरमा ।।७३
मदनोन्मादिनी चैव, मोहिनो पार्वणी-कला ।
शोषिणी वशिनी राजिन्यत्यन्त-सुभगा भगा ।।७४
पूषा वशा च सु-मना, रतिः प्रीतिर्धृतिस्तथा ।
ऋद्धिः सौम्या मरीच्यंशु-माला प्रत्यङ्गिरा तथा ।।७५
शशिनी चैव सुच्छाया, सम्पूर्ण - मण्डलोदया ।
तृष्टा चामृत - पूर्णा च, भग-यन्त्र-निवासिनी ।।७६
लिङ्ग - यन्त्रालया शम्भु-रूपा संयोग-योगिनी ।
द्राविणी बीज-रूपा च, अक्षुब्धा साधक-प्रिया ।।७७
राज-बीज-मयी राज्य - सुखदा वाञ्छित-प्रदा ।
रजः-संवीर्य-शक्तिश्च, शुक्र-विच्छिव-रूपिणी ।।७८
सर्व-सारा सार - मया, शिव-शक्ति-मयी प्रभा ।
संयोगानन्द-निलया, संयोग - प्रीति - मातृका ।।७९

संयोग - कुसुमानन्दा, संयोगा योग - वर्धिनी ।
संयोग - सुखदावस्था, चिदानन्दैक - सेविता ॥८०
अर्घ्य- पूजक - सम्पत्तिरर्घ्य - द्रव्य - स्वरूपिणी ।
सामरस्या परा प्रीता, प्रिय-सङ्गम-रूपिणी ॥८१
ज्ञान-दूती ज्ञान-गम्या, ज्ञान-योनिः शिवालया ।
चित्कला ज्ञान-सकला, स-कुला स-कुलात्मिका ॥८२
कला-चतुष्टया पद्मिन्यति-सूक्ष्मा परात्मिका ।
हंस-केलि-स्थली-च्छाया, हंस-द्वय-विकासिनी ॥८३
विरागता मोक्ष - कला, परमात्म - कलावती ।
विद्या - कलान्तरात्मस्था, चतुष्टय-कलावती ॥८४
विद्या-सन्तोषणा तृप्तिः, पर-ब्रह्म-प्रकाशिका ।
परमात्म - परा वस्तु-लीना शक्ति-चतुष्टयी ॥८५
शान्तिर्बोध-कलावाप्तिः, पर-ज्ञानात्मिका कला ।
पश्यन्ती परमात्मस्था, चान्तरात्म-कलाऽकुला ॥८६
मध्यमा वैखरी चात्म - कलानन्दा कलावती ।
तारिणी तरणी तारा, शिवलिङ्गालयाऽऽत्मवित् ॥८७
परस्पर - शुभाचारा, ब्रह्मानन्द - विनोदिनी ।
रसालसा दूतरासा, सार्था सार्थ-प्रिया ह्युमा ॥८८
जात्यादि-रहिता योगि-योगिन्यानन्द-वर्धिनी ।
वीर - भाव - प्रदा दिव्या, वीरसूर्वीर-भावदा ॥८९

पशुत्वाभि - वीर - गतिर्वीर - सङ्ग-महोदया ।
मूर्धाभिषिक्ता राज - श्रीः, क्षत्रियोत्तम-मातृका ॥९०
शस्त्रास्त्र-कुशला शोभा, रसस्था युद्ध-जीविका ।
विजया योगिनी यात्रा, पर-सैन्य-विमर्दिनी ॥९१
पूर्णा वित्तैषिणी वित्ता, वित्त-सञ्चय-शालिनी ।
भाण्डागार-स्थिता रत्ना, रत्न-श्रेण्यधिवासिनी ॥९२
महिषी राज-भोग्या च, गणिका गण-भोग-भृत् ।
करिणी वडवा योग्या, मल्ल-सेना पदातिका ॥९३
सैन्य-श्रेणी शौर्य-रता, पताका ध्वज-वासिनी ।
सुच्छत्रा चाम्बिका चांबा, प्रजा-पालन-सद्गतिः ॥९४
सुरभिः पूजकाचारा, राज - कार्य - परायणा ।
ब्रह्म-क्षत्र-मयी सोम-सूर्यान्तर्यामिनी स्थितिः ॥९५
पौरोहित्य-प्रिया साध्वी, ब्रह्माणी यज्ञ-सन्ततिः ।
सोम-पान-परा प्रीता, जनाढ्या तपना क्षमा ॥९६
प्रतिग्रह-परा दात्री, सृष्टा जातिः सतां गतिः ।
गायत्री वेद-लभ्या च, दीक्षा सन्ध्या-परायणा ॥९७
रत्न-सद्दीधितिर्विश्व-वासना विश्व - जीविका ।
कृषि-वाणिज्य-भूतिश्च, वृद्धिर्धी च कुसीदिका ॥९८
कुलाधारा स - प्रसारा, मनोन्मनी परायणा ।
शूद्रा विप्र-गतिः कर्म - करी कौतुक - पूजिका ॥९९

नाना-विचार-चतुरा, बाला प्रौढा कला-मयी ।
सुकर्ण - धारा नौः पारा, सर्वाशा दुर्ग-मोचनी ।।१००
दुर्गा विन्ध्य - वनस्था च, कन्दर्प-नय-पूरणी ।
भू-भार-शमनी कृष्णा, रक्षाराध्या रसोल्लसा ।।१०१
त्रिविधोत्पात - शमनी, समग्र - सुख-शेवधिः ।
पञ्चावयव-वाक्य-श्रीः, प्रपञ्चोद्यान - चन्द्रिका ।।१०२
सिद्ध-सन्दोह-सुखिता, योगिनी - वृन्द - वन्दिता ।
नित्या-षोडश-रूपा च, कामेशी भग-मालिनी ।।१०३
नित्यक्लिन्ना च भीरुण्डा, वह्नि-मण्डल-वासिनी ।
महा-विद्येश्वरी नित्या, शिव-दूतीति विश्रुता ।।१०४
त्वरिता प्रथिता ख्याता, विख्याता कुल-सुन्दरी ।
नित्या - नील-पताका च, विजया सर्व-मङ्गला ।।१०५
ज्वाला-माला विचित्रा च, महा-त्रिपुर-सुन्दरी ।
गुरु - वृन्दा पर - गुरुः, प्रकाशानन्द-नाथिनी ।।१०६
शिवानन्दनाथ - रूपा, शक्त्यानन्द-स्वरूपिणी ।
देव्यानन्दनाथ - मयी, कौलेशानन्द - नाथिनी ।।१०७
दिव्यौघ - गुरु - रूपा च, समयानन्द-नाथिनी ।
शुक्ल-देव्यानन्द-नाथा, कुलेशानन्द - नाथिनी ।।१०८
क्लिन्नाङ्गानन्द - रूपा च, समयानन्द-नाथिनी ।
वेदानन्दनाथ - मयी, सहजानन्द - नाथिनी ।।१०९

सिद्धौघ - गुरु - रूपा च, अपरा-गुरु-रूपिणी ।
गगनानन्दनाथा च, विश्वानन्द - स्व - नाथिनी ॥११०
विमलानन्द - नाथा च, मदनानन्द - नाथिनी ।
भुवनाद्या च लीलाऽऽद्या, नन्दनानन्द-नाथिनी ॥१११
स्वात्मानन्दानन्द-रूपा, प्रियाद्यानन्द-नाथिनी ।
मानवौघ - गुरु - श्रेष्ठा, परमेष्ठि - गुरु - प्रभा ॥११२
पर-गुह्या गुरु - शक्तिः, स्व-गुरु-कीर्तन-प्रिया ।
त्रैलोक्य - मोहन - ख्याता, सर्वाशा-परिपूरका ॥११३
सर्व - संक्षोभिणी पूर्वाम्नाय - प्रथित - वैभवा ।
शिवा-शक्तिः शिव-शक्तिः, शिव-चक्र-त्रयालया ॥११४
सर्व-सौभाग्यदाख्या च, सर्वार्थ- साधिकाह्वया ।
सर्व - रक्षा - कराख्या च, दक्षिणाम्नाय-देवता ॥११५
मध्यार्क - चक्र - निलया, पश्चिमाम्नाय-देवता ।
नव - चक्र - कृतावासा, कौबेराम्नाय - देवता ॥११६
कुबेर - पूज्या कुलजा, कुलाम्नाय - प्रवर्तिनी ।
विन्दु - चक्र - कृतावासा, मध्य-सिंहासनेश्वरी ॥११७
श्रीविद्या च महा-लक्ष्मीः, लक्ष्मीः शक्ति-त्रयात्मिका ।
सर्व-साम्राज्य-लक्ष्मीश्च, पञ्च-लक्ष्मीति विश्रुता ॥११८
श्रीविद्या च पर-ज्योतिः, पर-निष्कल-शाम्भवी ।
मातृका पञ्च-कोशी च, श्रीविद्या त्वरिता तथा ॥११९

पारिजातेश्वरी चैव, त्रिकूटा पञ्च - वाणगा ।
पञ्च-कल्प-लता पञ्च-विद्या चामृत - पीठिका ॥१२०
सुधासू रमणेशाना, चान्नपूर्णा च काम - धुक् ।
श्रीविद्या सिद्ध-लक्ष्मीश्च, मातङ्गी भुवनेश्वरी ॥१२१
वाराही पञ्च - रत्नानामीश्वरी मातृ - वर्णगा ।
परा-ज्योतिः कोश-रूपा, ऐन्दवी कलया युता ॥१२२
परितः स्वामिनी शक्ति-दर्शना रवि-विन्दु-युक् ।
ब्रह्म - दर्शन - रूपा च, शिव - दर्शन - रूपिणी ॥१२३
विष्णु-दर्शन-रूपा च, सृष्टि-चक्र-निवासिनी ।
सौर - दर्शन - रूपा च, स्थिति-चक्र-कृतालया ॥१२४
बौद्ध - दर्शन - रूपा च, महा - त्रिपुर-सुन्दरी ।
तत्त्व-मुद्रा-स्वरूपा च, प्रसन्ना ज्ञान - मुद्रिका ॥१२५
सर्वोपचार - सन्तुष्टा, हृन्मयी शीर्ष - देवता ।
शिखा-स्थिता ब्रह्म-मयी, नेत्र-त्रय-विलासिनी ॥१२६
अस्त्रस्था चतुरस्रा च, द्वारका द्वार-वासिनी ।
अणिमा पश्चिमस्था च, लघिमोत्तर - देवता ॥१२७
पूर्वस्था महिमेशित्वा, दक्षिण - द्वार - देवता ।
वशित्वा वायु - कोणस्था, प्राकाम्येशान-देवता ॥१२८
अग्नि-कोण-स्थिता भुक्तिरिच्छा नैर्ऋत-वासिनी ।
प्राप्ति-सिद्धिरवस्था च, प्राकाम्यार्ध-विलासिनी ॥१२९

ब्राह्मी माहेश्वरी चैव, कौमारी वैष्णवी तथा ।
वाराह्यैन्द्री च चामुण्डा, महा-लक्ष्मीर्दिशां गतिः ।।१३०
क्षोभिणी-द्राविणी-मुद्राऽऽकर्षोन्मादन-कारिणी ।
महांकुशा खेचरी च, बीजाख्या योनि-मुद्रिका ।।१३१
सर्वाशापूर - चक्रस्था, कार्य-सिद्धि-करी तथा ।
कामार्किषिणिका - शक्तिर्बुद्ध्याकर्षण - रूपिणी ।।१३२
अहङ्कारार्किषणी च, शब्दाकर्षण - रूपिणी ।
स्पर्शाकर्षण - रूपा च, रूपाकर्षण - रूपिणी ।।१३३
रसाकर्षण - रूपा च, गन्धाकर्षण - रूपिणी ।
चित्ताकर्षण - रूपा च, धैर्याकर्षण - रूपिणी ।।१३४
स्मृत्याकर्षण - रूपा च, बीजाकर्षण - रूपिणी ।
अमृतार्किषणी चैव, नामाकर्षण - रूपिणी ।।१३५
शरीरार्किषणी देवी, आत्माकर्षण - रूपिणी ।
षोडश - स्वर - रूपा च, श्रवत्-पीयूष-मन्दिरा ।।१३६
त्रिपुरेशी सिद्ध - रूपा, कला-दल-निवासिनी ।
सर्व - संक्षोभ - चक्रेशी, शक्तिर्गुप्त-तराऽभिधा ।।१३७
अनङ्ग - कुसुमा - शक्तिरनङ्ग - कटि - मेखला ।
अनङ्ग - मदनाऽनङ्ग - मदनातुर - रूपिणी ।।१३८
अनङ्ग - रेखा चानङ्ग - वेगानङ्गांकुशाऽभिधा ।
अनङ्ग-मालिनी शक्तिरष्ट - वर्ग - दिगन्विता ।।१३९

वसु - पत्र - कृतावासा, श्रीमत्-त्रिपुर-सुन्दरी ।
सर्व-साम्राज्य - सुखदा, सर्व - सौभाग्यदेश्वरी ॥१४०
सम्प्रदायेश्वरी सर्व - संक्षोभण - करी तथा ।
सर्व - विद्राविणी सर्वाकर्षणोप - प्रकारिणी ॥१४१
सर्वाह्लादन - शक्तिश्च, सर्व-जृम्भण-कारिणी ।
सर्व-स्तम्भन-शक्तिश्च, सर्व - सम्मोहिनी तथा ॥१४२
सर्व-वश्य-करी-शक्तिः, सर्व - सर्वानुरञ्जिनी ।
सर्वोन्मादन - शक्तिश्च, सर्वार्थ-सिद्धि-कारिणी ॥१४३
सर्व-सम्पत्तिदा - शक्तिः, सर्व-मन्त्र-मयी तथा ।
सर्व - द्वन्द्व - क्षय-करी, सिद्धिस्त्रिपुर-वासिनी ॥१४४
सर्वार्थ-साधकेशी च, सर्व - कार्यार्थ-सिद्धिदा ।
चतुर्दशार - चक्रेशी, कला-याण - समन्विता ॥१४५
सर्व-सिद्धि-प्रदा देवी, सर्व-सम्पत् - प्रदा तथा ।
सर्व-प्रियङ्करी शक्तिः, सर्व - मङ्गल - कारिणी ॥१४६
सर्व-काम-प्रपूर्णा च, सर्व - दुःख - प्रमोचिनी ।
सर्व-मृत्यु-प्रशमनी, सर्व - विघ्न - विनाशिनी ॥१४७
सर्वाङ्ग - सुन्दरी देवी, सर्व-सौभाग्य-दायिनी ।
त्रिपुरेशी सर्व - सिद्धि - प्रदा च दश-कोणगा ॥१४८
सर्व-रक्षा-करेशी च, निगर्भा - योगिनी तथा ।
सर्वज्ञा सर्व - शक्तिश्च, सर्वैश्वर्य - प्रदा तथा ॥१४९

सर्व-ज्ञान-मयी देवी, सर्व-व्याधि - विनाशिनी ।
सर्वाधार - स्वरूपा च, सर्व - पाप - हरा तथा ।।१
सर्वानन्द-मयी देवी, सर्व - रक्षा - स्वरूपिणी ।
महिमा - शक्ति-देवी च, देवी सर्व - समृद्धिदा ।।१
अन्तर्दशार - चक्रेशी, देवी त्रिपुर - मालिनी ।
सर्व - रोग - हरेशी च, रहस्या योगिनी तथा ।।१
वाग्-देवी वशिनी चैव, देवी कामेश्वरी तथा ।
मोदिनी विमला चैव, अरुणा जयिनी तथा ।।१
सर्वेश्वरी कौलिनी च, ह्यष्टार-सर्व - सिद्धिदा ।
सर्व-काम - प्रदेशी च, परापर - रहस्य - वित् ।।१
त्रिकोण - चतुरस्था च, सर्वैश्वर्याऽऽयुधात्मिका ।
कामेश्वरी बाण-रूपा, कामेशी चाप - रूपिणी ।।१
कामेशी पाश-रूपा च, कामेश्यंकुश - रूपिणी ।
कामेश्वरीन्द्र-शक्तिश्च, अग्नि-चक्र - कृतालया ।।१
काम-गिर्यधि-देवी च, त्रिकोणस्थाऽग्र-कोणगा ।
दक्ष - कोणेश्वरी विष्णु - शक्तिर्जालन्धराश्रया ।।१
सूर्य - चक्रालया रुद्र - शक्तिर्वामाङ्ग - कोणगा ।
सोम-चक्र-ब्रह्म-शक्तिः, पूर्ण - गिर्यनु - रागिणी ।।१
श्रीमत्-त्रिकोण-भुवना, त्रिपुरात्म - महेश्वरी ।
सर्वानन्द - मयेशी च, विन्दु-गति-रहस्य - भृत् ।।१

पर - ब्रह्म - स्वरूपा च, महा - त्रिपुर-सुन्दरी ।
सर्व - चक्रान्तरस्था च, समस्त - चक्र-नायिका ।।१६०
सर्व - चक्रेश्वरी सर्व - मन्त्राणामीश्वरी तथा ।
सर्व - विद्येश्वरी चैव, सर्व - वागीश्वरी तथा ।।१६१
सर्व - योगीश्वरी चैव, पीठेश्वर्य्यखिलेश्वरी ।
सर्व - कामेश्वरी सर्व - तत्त्वैश्वर्यागमेश्वरी ।।१६२
शक्तिः शक्ति-दृगुल्लासा, निर्द्वन्द्वा द्वैत-गर्भिणी ।
निष्प्रपञ्चा महा-माया, स-प्रपञ्चा स्व-वासिनी ।।१६३
सर्व - विश्वोत्पत्ति - धात्री, परमानन्द-सुन्दरी ।
इत्येतत् कथितं दिव्यं, परमानन्द - कारणम् ।।१६४
लावण्य-सिन्धु-लहरी, बालायास्तोष-मन्दिरम् ।
सहस्र - नाम-तन्त्राणां, सारमाकृष्य पार्वति ! ।।१६५
अनेन स्तुवतो नित्यमर्ध - रात्रे निशा - मुखे ।
प्रातः-काले च पूजायां, सर्व-कालमतः प्रिये ! ।।१६६
सर्व - साम्राज्य-सुखदा, बाला च परि-तुष्यति ।
रत्नानि विविधान्यस्य, वित्तानि प्रचुराणि च ।।१६७
मनोरथ - पथस्थानि, ददाति परमेश्वरी ।
पुत्राः पौत्राश्च वर्धन्ते, सन्ततिः सर्वं - कालिका ।।१६८
शत्रवस्तस्य नश्यन्ति, वर्धन्तेऽस्य बलानि च ।
व्याधयस्तस्य दूरस्थाः, सकलान्यौषधानि च ।।१६९

मन्दिराणि विचित्राणि, राजन्ते तस्य सर्वदा ।
कृषिः फल-वती तस्य, भूमिः काम-दुघाऽव्यया ।।१७
स्फीतो जन-पदस्तस्य, राज्यं तस्य निरीतिकम् ।
मातङ्गाः पक्षिणस्तुङ्गाः, सिञ्चन्तो मद-वारिभिः ।।१९
द्वारे तस्य विराजन्ते, हृष्टा नाग - तुरङ्गमाः ।
प्रजास्तस्य विराजन्ते, निर्विवादाश्च मन्त्रिणः ।।१७
ज्ञातयस्तस्य तुष्यन्ति, शीलं तस्याति-सुन्दरम् ।
लक्ष्मीस्तस्य वशे नित्यं, स्वासना च मनोरमा ।।१७
गद्य-पद्य - मयी वाणी, तस्य गङ्गा-तरङ्ग-वत् ।
नाना - पद - पदार्थानां, वाद-चातुर्य-सम्भृता ।।१९
समग्र-रस-सम्पत्ति-शालिनी लास्य - मालिनी ।
अदृष्टान्यपि शास्त्राणि, प्रकाश्यन्ते निरन्तरम् ।।१९
निग्रहः पर - वाक्यानां, सभायां तस्य जायते ।
स्तुवन्ति वन्दिनस्तं वै, राजानो दास-वत् तथा ।।१९
शस्त्राण्यस्त्राणि तदङ्गे, जनयन्ति रुजां न हि ।
महिलास्तस्य वशगाः, सर्वावस्था भवन्ति वै ।।१९
विषं निर्विषतां याति, पानीयममृतं भवेत् ।
पर-पक्ष - स्तम्भनं च, प्रति-पक्षस्य जृम्भणम् ।।१
नव-रात्रेण जायेत, स तदभ्यास - योग - वित् ।
अहो-रात्रं पठेद् यस्तु, निस्तन्द्रः शान्त-मानसः ।।१

वशे तस्य प्रजा याति, सर्वे लोकाः सु-निश्चितम् ।
षण्मासाभ्यास-योगेन, योग-मायाति-निश्चितम् ॥१८०
नित्यं काम-कलां ध्यायन्, यः पठेत् स्तोत्रमुत्तमं ।
मदनोन्माद - कलिताः, पुरन्ध्र्यस्तद्-वशानुगाः ॥१८१
लावण्य-मदनाः साक्षाद्, वैदग्ध्य-मुदितेक्षणाः ।
प्रेम - पूर्णमपि वशे, ह्युर्वशीं स हि विन्दति ॥१८२
भूर्ज - पत्रे रोचनया, कुंकुमेन शुभे दिने ।
लाक्षा - रस - द्रवेणापि, यावकैर्वा विशेषतः ॥१८३
धातु-रागेण वा देवि ! लिखितं यन्त्रमञ्चितम् ।
सुवर्ण - रौप्य - गर्भस्थं, सु-सम्पूतं सुसाधितम् ॥१८४
बाला-बुद्धया पूजितं च, प्रतिष्ठित-समीरणम् ।
धारयेन्मस्तके कण्ठे, बाहु - मूले तथा हृदि ॥१८५
नाभौ वापि धृतं धन्यं, जयदं सर्व - कामदम् ।
रक्षणं नापरं किञ्चिद्, विद्यते भुवन - त्रये ॥१८६
ग्रह-रोगादि-भय-हृत्, सुख - कृत्य - विवर्धनम् ।
बल - वीर्य - करं क्रूर-भूत-शत्रु - विनाशनम् ॥१८७
पुत्र - पौत्रान् गुण-गणैर्वर्धनं धन-धान्य - कृत् ।
धरण्यां सा पुरी धन्या, यत्रायं साधकोत्तमः ॥१८८
यद्-गृहे लिखितं तिष्ठेत्, स्तोत्रमेतद् वरानने !
तत्र चाहं शिवे ! नित्यं, हरिश्च कमला तथा ॥१८९

वसामः सर्व - तीर्थानामुत्पत्तिस्तत्र जायते ।
यो वापि पाठयेद् भक्त्या, पठेद् वै साधकोत्तमः ।।१६

ज्ञानानन्द - कला-योगादैक्य-वृत्ति स विन्दति ।
स्तोत्रेणानेन देवेशि ! तव पूजा - फलं लभेत् ।।१६

षोढा - न्यास - तनुर्भूत्वा, पठितव्यं प्रयत्नतः ।
उत्तमा सर्व - तन्त्राणां, बालायाः पूजन-सृतिः ।।१६

तत्रोत्तमा षोडशार्णा, तत्रेदं स्तोत्रमुत्तमम् ।
नाशिष्याय प्रदातव्यमशुद्धाय शठाय च ।।१६

अलसायाप्रयत्नायाशिवाभक्ताय सुन्दरि !
भक्ति - हीनाय मलिने, गुरु-निन्दा - पराय च ।।१६

विष्णु - भक्ति - विहीनाय, विकल्पावृत-बुद्धये ।
देयं भक्त - वरे मुक्तेः, कारणं भक्ति - वर्धनम् ।।१६

लता - योगे पठेद् यस्तु, स्तोत्रमेतद् वरानने !
सैव कल्प-लता तस्य, वाञ्छा-फल-करी तथा ।।१६

पुष्पिताया लता - योगे, कुरङ्ग-मुखि साधकः ।
अक्षुब्धः सन् पठेद् यस्तु, शत-यज्ञस्य पुण्य-भाक् ।।१६

ब्रह्मादयोऽपि देवेशि ! प्रार्थयन्ति पद - द्वयम् ।
स्वयं शिवः स विज्ञेयो, यो बाला-भाव-लम्पटः ।।१६

ब्रह्मानन्द-मयी ज्योत्स्ना, सदा-शिव-विधूदिता ।
आनन्दो योऽपि यं वेदा,वदन्त्यस्या वशे स्थिताः ॥१९९
आह्लादनं बाला-ध्यानाद्, बालाया नाम-कीर्तनात् ।
सदानन्दाभ्यास-योगात्, सदाऽऽनन्दः प्रजायते ॥२००

॥ श्रीरुद्र-यामले तन्त्रे भैरव-भैरवी-सम्वादे
श्रीबाला-त्रिपुर-सुन्दरी-सहस्र-नामकम् ॥



श्री बाला स्तव-राजः

॥ पूर्व-पीठिका—श्रीपार्वत्युवाच ॥

गुणाधीश महा - देव ! रहस्यं वद सत्वरम् ।
बाला-देव्या परं श्रेष्ठं, स्तव-राजं कथं प्रभो ! ॥१

॥ ईश्वर उवाच ॥

शृणु प्राणेश्वरि ! वक्ष्ये, स्तव-राजं महा-फलम् ।
यन्न कस्यचिदाख्यातं, गोप्यं कुरु सदाऽनघे ! ॥२
तव भक्त्या महेशानि ! अकथ्यं कथ्यतेऽधुना ।
गोपनं कुरु रुद्राणि ! गोपयेन्मातृ - जार - वत् ॥३
त्रि-वीज-भाजा-युक्तेन, कराङ्गौ न्यासमाचरेत् ।
ध्यानं ततो शृणुष्वाशु, सर्वैश्वर्य - प्रदायकम् ॥४

॥ मूल पाठ ॥

विनियोग : ॐ अस्य श्रीबाला-स्तव-राज-स्तो
श्रीमृत्युञ्जय ऋषिः । ककुप् छन्दः । श्रीबाला देव
क्लीं वीजं । सौः शक्तिः । ऐं कीलकं । भोग - मो
पाठे विनियोगः ।

॥ ध्यान ॥

अक्ष-पुस्त-धरां रक्तां, वराभय - कराम्बुजाम् ।
चन्द्र-मुण्डां त्रि-नेत्रां च, ध्याये बालां फल-प्रदाम् ॥

ऐं त्रैलोक्य-विजयायै हुं फट्। क्लीं त्रिगुण-रहितायै हुं फट्। सौः सर्वैश्वर्य-दायिन्यै हुं फट् ।।

नातः पर - तरा सिद्धिर्नातः पर - तरा गतिः ।
नातः पर - तरो मन्त्रः, सत्यं सत्यं वदाम्यहम् ।।१

रक्तां रक्तच्छदां तीक्ष्णां, रक्तपां रक्त-बाससीम् ।
स्वरूपां रत्न-भूषां च, ललज्जिह्वां परां भजे ।।२

त्रैलोक्य-जननीं सिद्धां, त्रिकोणस्थां त्रिलोचनाम् ।
त्रिवर्ग-फलदां शान्तां, वन्दे वीज-त्रयात्मिकाम् ।।३

श्रीबालां वारुणी-प्रीतां, बालार्क-कोटि-द्योतिनीम् ।
वरदां बुद्धिदां श्रेष्ठां, वामाचार - प्रियां भजे ।।४

चतुर्भुजां चारु-नेत्रां, चन्द्र-मौलि कपालिनीम् ।
जतुः-षष्ठि-योगनीशां, वीर-वन्द्यां भजाम्यहम् ।।५

कौलिकां कुल-तत्त्वस्थां, कौलाबाराङ्क-बाहनाम् ।
कौसुम्भ-वर्णां कौमारीं, कवर्म - धारिणीं भजे ।।६

द्वादश - स्वर - रूपायै, नमस्तेऽस्तु नमो नमः ।
नमो नमस्ते बालायै, कारुण्यायै नमो नमः ।।७

विद्याऽविद्याऽऽद्य-विद्यायै, नमस्तेऽस्तु नमो नमः ।
विद्या - राज्ञै महा - देव्यै, शिवायै सततं नमः ।।८

ऐं बालायै विद्महे क्लीं, त्रि - भुवनेश्वर्यै धीमहि,
सौः तन्नो देवी प्रचोदयात्, ऐं बालायै स्वाहा ।
द्वादशान्तालयां श्रेष्ठां, षोडशाधारगां शिवाम् ।
पञ्चेन्द्रिय-स्वरूपाख्यां, भूयो भूयो नमाम्यहम् ॥९
ब्रह्म-विद्यां ब्रह्म-रूपां, ब्रह्म-ज्ञान - प्रदायिनीम् ।
वसु-प्रदां वेद - मातां, वन्दे बालां शुभाननाम् ॥१०
अघोरां भीषणामाद्यामनन्तोपरि - संस्थिताम् ।
देव - देवेश्वरीं भद्रां, श्रीबालां प्रणमाम्यहम् ॥११
भव - प्रियां भवाधरां, भग-रूपां भग-प्रियाम् ।
भयानकां भूत - मातां, भू - दैव-पूजितां भजे ॥१२
अकारादि-क्षकारान्तां, क्लीवाक्षरात्मिकां पराम् ।
वन्दे वन्दे महा-मायां, भव-भव्य - भयापहाम् ॥१३
नाडी-रूप्यै नमस्तेऽस्तु, धातु - रूप्यै नमो नमः ।
जीव-रूप्यै नमस्यामि, ब्रह्म - रूप्यै नमो नमः ॥१४
नमस्ते मन्त्र - रूपायै, पीठगायै नमो नमः ।
सिंहासनेश्वरि ! तुभ्यं, सिद्धि-रूप्यै नमो नमः ॥१५
नमस्ते मातृ - रूपिण्यै, नमस्ते भैरव - प्रिये !
नमस्ते चोप - पीठायै, बालायै सततं नमः ॥१६
योगेश्वर्यै नमस्तेऽस्तु, योगदायै नमो नमः ।
योग-निद्रा-स्वरूपिण्यै, बाला - देव्यै नमो नमः ॥१७

सु - पुण्यायै नमस्तेऽस्तु, सु-शुद्धायै नमो नमः ।
सु-गुह्यायै नमस्तेऽस्तु, बाला - देव्यै नमो नमः ॥१८
योनि-प्रियायै योन्यै वै, योनि-रूप्यै नमो नमः ।
योनि-सर्पि विलेपिन्यै, योनिस्थायै नमो नमः ॥१९

॥ फल-श्रुति ॥

इतीदं स्तव-राजाख्यं, सर्व-स्तोत्रोत्तमोत्तमम् ।
ये पठन्ति महेशानि ! पुनर्जन्म न विद्यते ॥१
महा-कष्टे महा-रोगे, त्रिधा वा पञ्चधा पठेत् ।
महा - कष्टं महा - रोगं, नश्यते नात्र संशयः ॥२
सर्व - पाप - हरं पुण्यं, सर्व-स्फोट-विनाशकम् ।
सर्व - सिद्धि - प्रदं श्रेष्ठं, भोगैश्वर्य-प्रदायकम् ॥३
यज्ञानां षोडशानां च, कोटि-कोटि-गुणोत्तरम् ।
फलं प्राप्नोति पाठेन, चैक - वारेण सुन्दरि ! ॥४
षोडशानां च दानानां, कोटयर्बुद-फलं स्मृतम् ।
पाठ - मात्रेण लभते, नात्र कार्या विचारणा ॥५
पूजान्ते पठते स्तोत्रं, मैथुने च विशेषतः ।
पठेच्च चक्र - पूजायां, फलं वक्तुं न शक्यते ॥६
विशेषतश्चार्ध - रात्रे, ये पठन्ति महेश्वरि !
सर्वारिष्टानि नश्यन्ति, लभते वाञ्छितं फलम् ॥७

धातृ - मूले बिल्व - मूले, वट - धत्तूर-मूलके ।
मुण्डोपरि शव - पृष्ठे, श्मशाने च चतुष्पथे ।।८
शिवागारे शून्य - गेहे, चैक - लिङ्गे शिवाग्रके ।
दुर्ग - पर्वते चोद्याने, वारुणी - घटे चार्चने ।।९
पठेत् स्तोत्रं सदा भक्त्या, त्रैलोक्य-विजयी भवेत् ।
रजस्वला - भगं स्पृष्ट्वा, पठेदेकाग्र - मानसः ।।१०
सत्यं सत्यं वरारोहे ! लभते परमं पदम् ।
तस्मात् सर्व - प्रयत्नेन, पठनीयं सदा बुधैः ।।११

।।श्रीब्रह्म-यामल-तन्त्रे श्रीबाला-देव्याः स्तव-राजः सम्पूर्णम् ।।

श्रीबाला मकरन्द स्तवम्

॥ पूर्व-पीठिका—श्री रुद्र उवाच ॥

शृणु देवि ! प्रवक्ष्यामि, मकरन्द - स्तवं शुभम् ।
गोप्याद् गोप्य-तरं गोप्यं, महा-कौतूहलं परम् ॥१
बालाः परमेशान्याः, स्तोत्र - चूडामणिः शिवे !
मकरन्दस्य स्तोत्रस्य, ऋषिर्नारद - संज्ञकः ॥२
छन्दोऽनुष्टुपुदाख्यातं, श्रीबाला देवता स्मृता,
ऐं बीजं शक्तिः सौः प्रोक्तं, कीलकं क्लीं तथैव च ।
भोग-मोक्षस्य सिद्धचर्थे, विनियोगः प्रकीर्तितः ॥३

॥ मूल पाठ ॥

विनियोग : ॐ अस्य श्रीबाला-मकरन्द-स्तोत्रस्य श्रीनारदः ऋषिः, अनुष्टुप् छन्दः, श्रीबाला देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, भोग-मोक्ष-सिद्धचर्थे पाठे विनियोगः ।

ऋष्यादि-न्यास : श्रीनारद-ऋषये नमः शिरसि । अनुष्टुप् छन्दसे नमः मुखे । श्रीबाला-देवतायै नमः हृदि । ऐं बीजाय नमः गुह्ये । सौः शक्तये नमः नाभौ । क्लीं कीलकाय नमः पादयोः । भोग - मोक्ष-सिद्धचर्थे पाठे विनियोगाय नमः सर्वाङ्गे ।

नमस्तेऽस्तु परां शक्ति, नमस्ते भक्त - वत्सले !
नमस्तेऽस्तु गुणातीतां, बालां सिद्धि-प्रदाऽम्बिकाम् ॥१
भव-दुःखाब्धि-तारन्तीं, परां निर्वाण-दामिनीम् ।
धनदां ज्ञानदां सत्यां, श्रीबालां प्रणमाम्यहम् ॥२
सिद्धि - प्रदां ज्ञान - रूपां, चतुर्वर्ग-फल-प्रदाम् ।
आधि-व्याधि-हरां वन्दे, श्रीबालां परमेश्वरीम् ॥३
ऐंकार-रूपिणीं भद्रां, क्लींकार-गुण-सम्भवाम् ।
सौःकार-रूप-रूपेशीं, बालां बालार्क-सन्निभाम् ॥४
ऊर्ध्वाम्नायेश्वरीं देवीं, रक्तां रक्त-विलेपनाम् ।
रक्त-वस्त्र-धरां सौम्यां, श्रीबालां प्रणमाम्यहम् ॥५
राज - राजेश्वरीं देवीं, रजोगुणात्मिकां भजे ।
ब्रह्म-विद्यां महा-मायां, त्रिगुणात्मक-रूपिणीम् ॥६
पञ्च - प्रेतासनस्थां च, पञ्च-मकार-भक्षकाम् ।
पञ्च - भूतात्मिकां चैव, नमस्ते करुणा-मयीम् ॥७
सर्व-दुःख-हरां दिव्यां, सर्व-सौख्य-प्रदायिनीम् ।
सिद्धिदां मोक्षदां भद्रां, श्रीबालां भावयाम्यहम् ॥८
नमस्तस्यै महा - देव्यै, देव - देवेश्वरि परे !
सर्वोपद्रव - नाशिन्यै, बालायै सततं नमः ॥९
गुह्याद् गुह्य-तरां गुप्तां, गुह्येशीं देव-पूजिताम् ।
हर-मौलि-स्थितां देवीं, बालां वाक्सिद्धिदां शिवां ॥१०

व्रणहां सोम - तिलकां, सोम-पान-रतां पराम् ।
सोम-सूर्याग्नि-नेत्रां च, वन्देऽहं हर-वल्लभाम् ।।११
अचिन्त्याकार-रूपाख्यां, ॐकाराक्षर-रूपिणीम् ।
त्रिकाल-सन्ध्या-रूपाख्यां, भजामि भक्त-तारिणीम् ।।१२
कीर्तिदां योगदां रादां, सौख्य-निर्वाणदां तथा ।
मन्त्र-सिद्धि-प्रदामीडे, सृष्टि-स्थित्यन्त-कारिणीम् ।।१३
नमस्तुभ्यं जगद्धात्रे, जगत्-तारिणि चाम्बिके !
सर्व-वृद्धि-प्रदे देवि ! श्रीविद्यायै नमोऽस्तु ते ।। १४
दया-रूप्यै नमस्तेऽस्तु, कृपा-रूप्यै नमोऽस्तु ते ।
शान्ति-रूप्यै नमस्तेऽस्तु, धर्म-रूप्यै नमो नमः ।।१५
पूर्ण-ब्रह्म - स्वरूपिण्यै, नमस्तेऽस्तु नमो नमः ।
ज्ञानार्णवायै सर्वायै, नमस्तेऽस्तु नमो नमः ।।१६
पूतात्मायै परात्मायै, महात्मायै नमो नमः ।
आधार-कुण्डली - देव्यै, भूयो भूयो नमाम्यहम् ।।१७
षट्-चक्र - भेदिनी पूर्णा, षडाम्नायेश्वरी परा ।
परा - परात्मिका सिद्धा, श्रीबाला शरणं मम ।।१८

।। फल-श्रुति ।।

इदं श्रीमकरन्दाख्यं, स्तोत्रं सर्वागमोत्तकम् ।
स्तोत्र-राजमिदं देवि ! धारय त्वं कुलेश्वरि ! ।।१

भोजने मैथुने दुर्गे, सुरा - पात्रे गुरोर्गृहे ।
एक - लिङ्गे शून्य - गेहे, नदी-सङ्गम-गोकुले ॥२

राज - द्वारे चिप्तराघे, देवालये चतुष्पथे ।
पुण्य - तीर्थे कौलिकाग्रे, वेश्या - गेहे सुरालये ॥३

पठेत् स्तोत्रं महेशानि ! चान्द्रायण-शतं लभेद् ।
अश्वमेधादि-यज्ञानां, तुला - दानादिकादिनाम् ॥४

गङ्गादि-सर्व - तीर्थानां, पठनात् फलमाप्नुयात् ।
न देयं पर - निन्देभ्यो, गुरु-द्वेष - कराय च ॥५

पशु - मार्ग - रतेभ्यश्च, नैव देयं सदा प्रिये !
पुण्यं यशस्यमायुष्यं, देवानामपि दुर्लभम् ॥६

पाठ - मात्रेण देवेशि ! सर्वारिष्टं विनश्यति ।
डाकिनी-भूत-प्रेतानां, योगिनी-राक्षसादीनाम् ॥७

कूष्माण्ड - भैरवादीनां, पशु-पक्षि-मृगादिनाम् ।
किन्नराणां च नागानां, वैरिणां, दानवादिनाम् ॥८

यक्षाणां यक्षिणीनां च, ग्रह - बेतालकादिनाम् ।
डाकानां गाणपत्यानां, प्रमथानां नरादिनाम् ॥९

राज्ञां मन्त्रिणां चैव, प्रजानां च पिशाचिनाम् ।
कबन्धानां पूतनानां, अपस्मार - ग्रहादिनाम् ॥१०

आकाश-चारिणीनां च, बाल-ग्रहादिनाम् तथा ।
पठनान्नश्यते कान्ते ! दोषान्नाशयते ध्रुवम् ।।११
गोप्यं कुरु कुलेशानि ! त्रि-सत्यं मम भाषितम् ।
गोप्यान्मोक्ष - प्रदं चैव, प्रकाशान्मृत्युमाप्नुयात् ।१२
भक्ति - हीनाय पुत्राय, दत्वा नरकमाप्नुयात् ।
सुशीलाय सु - पुण्याय, दत्वा शुभ-फलं लभेद् ।।१३

।। श्रीरुद्र-यामले तन्त्रे शिव-पार्वती-सम्वादे
श्रीबाला-देव्या मकरन्द-स्तवम् सम्पूर्णम् ।।



श्री बाला भुजंग-स्तोत्रम्

॥ श्री नील-लोहित उवाच ॥

जगद्योनि-रूपां सुवेशीं च रक्तां, गुणातीत - संज्ञां
महा-गुह्य-गुह्याम् । महा-सर्प-भूषां भवेशादि - पूज्यां,
महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥१

महा-स्वर्ण-वर्णां शिव-पृष्ठ-संस्थां, महा-मुण्ड-मालां
गले शोभमानाम् । महा-चर्म-वस्त्रां महा-शङ्ख हस्तां,
महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥२

सदा सु-प्रसन्नां भृता-सूक्ष्म-सूक्ष्मां, वराभीति-हस्तां
धृतावाक्ष-पुस्ताम् । महा - किन्नरेशीं भगाकार-विद्यां
महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥३

तिनीं तीकिनीनां रवा किङ्किणीनां, हहा-हा हहा-
हा महाऽऽलाप - शब्दाम् । तथै-थै तथै-थै महा-नृत्य-
नृत्यां, महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥४

ननां-ना रिरी-री महागीश शम्वू, हुहू-वू हुहू-
पशो रक्त-पानाम् । धिमिन्धीं धिमिन्धीं मृदङ्गस्य
शब्दां महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥५

महा-चक्र - संस्थां त्रि-मात्रा-स्वरूपां, शिवार्धाङ्ग
भूतां महा-पुष्प-मालाम् । महा-दुःख - हर्त्रीं महा-प्रेत
संस्थां, महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ॥६

स्फुरत्-पद्म-वक्त्रां हिमांशो कलापां, महा-कोम-लाङ्गीं सुरेशेन मान्याम् । जगत्-पालमेकाग्र-चित्तां सु-पुष्टां, महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ।।७

महा-दैत्य-नाशीं सुरा-नित्य-पालीं, महा-बुद्धि-राशिं कवीनां मुखस्थाम् । जटीनां हृदिस्थां मनूनां शिरस्थां, महाऽत्युग्र-बालां भजेऽहं हि नित्याम् ।।८

।। फल-श्रुति ।।

भुजाङ्गाख्यं महा-स्तोत्रं, त्रिषु लोकेषु दुर्लभम् ।
महा - सिद्धि - प्रदं दिव्यं, चतुर्वर्ग-फल-प्रदम् ।।१
सर्व - ऋतु - फलं भद्रे ! सर्व-व्रत-फलं तथा ।
सर्व - दानोद्भवं पुण्यं, लभते नात्र संशयः ।।२
विवादे कलहे घोरे, महा - दुःखे पराजये ।
ग्रह - दोषे महा - रोगे, पठेत् स्तोत्रं विचक्षणः ।।३
सर्व-दोषाः विनश्यन्ति, लभते वांच्छितं फलम् ।
दूती-यागे पठेद् देवि ! सर्व - शत्रु - क्षयो भवेत् ।।४
महा - चक्रे पठेद् देवि ! लभते परमं पदम् ।
पूजान्ते पठतें भक्त्या, महा-बलि-फल-प्रदम् ।।५
पितृ - गेहे तुर्य - पथे, शून्यागारे शिवालये ।
बिल्व - मूले चैक - वृक्षे, रतौ मधु - समागमे ।।६
पठेत् स्तोत्रं महेशानि ! जीवन्मुक्तस्स उच्यते ।
त्रि-कालं पठते नित्यं, देवी-पुत्रत्वमाप्नुयात् ।।७

।। श्रीकालानल-तन्त्रे श्रीबालायाः भुजङ्ग-स्तोत्रं सम्पूर्णम् ।।

श्रीबाला मुक्तावली-स्तोत्रम्

बालार्क-कोटि-रुचिरां, कोटि-ब्रह्माण्ड-भूषिताम् ।
कन्दर्प-कोटि-लावण्यां, बालां वन्दे शिव-प्रियाम् ॥१

वह्नि-कोटि-प्रभां सूक्ष्मां, कोटि-कोटि-हेलिनीम् ।
वरदां रक्त-वर्णां च, बालां वन्दे सनातनीम् ॥२

ज्ञान-रत्नाकरां भीमां, पर - ब्रह्मावतारिणीम् ।
पञ्च - प्रेतासन - गतां, बालां वन्दे गुहाशयाम् ॥३

परा-प्रासाद-मूर्ध्नि-स्थां, पवित्रां पात्र-धारिणीम् ।
पशु-पाशच्छिदां तीक्ष्णां, बालां वन्दे शिवासनाम् ॥४

गिरिजां गिरि-मध्यस्थां, गीःरूपां ज्ञान-दायिनीम् ।
गुह्य-तत्त्व-परां चाद्यां, बालां वन्दे पुरातनीम् ॥५

बौद्ध-कोटि-सु-सौन्दर्यां, चन्द्र-कोटि-सु-शीतलाम् ।
आशा-वासां परां देवीं, वन्दे बालां कपर्दिनीम् ॥६

सृष्टि-स्थित्यन्त-कारिण्यां, त्रिगुणात्मक-रूपिणीम् ।
काल-ग्रसन-सामर्थ्यां, बालां वन्दे फल-प्रदाम् ॥७

यज्ञ - नाशि यज्ञ - देहां, यज्ञ-कर्म-शुभ-प्रदाम् ।
जीवात्मां विश्व-जननीं, बालां वन्दे परात्पराम् ॥८

॥ फल-श्रुति ॥

इत्येतत् परमं गुह्यं, नाम्ना मुक्तावली-स्तवम् ।
ये पठन्ति महेशानि ! फलं वक्तुं न शक्यते ॥१

गुह्याद्-गुह्य-तरं गुह्यं, महा-गुह्यं वरानने !
विद्यार्थी लभते विद्यां, धनार्थी लभते धनम् ॥२

कन्यार्थी लभते कन्यां, मोक्षार्थी मोक्षमाप्नुयात् ।
बहुनाऽत्र किमुक्तेन, चिन्ता - मणिरिवापरम् ॥३

गोपनीयं प्रयत्नेन, गोपनीयं न संशयः ।
अन्येभ्यो नैव दातव्यं, किमन्यच्छ्रोतुमिच्छसि ? ॥४

॥ श्रीविष्णु-यामले श्रीबाला-देव्या मुक्तावली-स्तोत्रम् ॥



श्रीबाला पंच-चामर-स्तवम्

गिरीन्द्र-राज-बालिकां, दिनेश-तुल्य-रूपिकाम् ।
प्रवाल-जाप्य-मालिकां, भजामि दैत्य-मर्दिकाम् ॥१

निःशेष-मौलि-धारिकां, नृ-मुण्ड-पंक्ति-शोभिकाम् ।
नवीन-यौवनाख्यकां, स्मरामि पाप-नाशिकाम् ॥२

भवार्णवात्तु तारिकां, भवेन सार्ध-खेलिकाम् ।
कुतर्क-मर्म-भञ्जिकां, नमामि प्रौढ-रूपिकाम् ॥३

स्वरूप-रूप-कालिकां, स्वयं स्वयम्भु-स्वात्मिकाम् ।
खगेश-राज-दण्डिकां, अ-ई-कर-सु-बीजकाम् ॥४

श्मशान-भूमि-शायिकां, विशाल-भीनि अम्बिकाम् ।
तुषार-तुल्य-वाचिकां, स-निम्न-तुङ्ग-नाभिकाम् ॥५

सुपट्ट-वस्त्र-साजिकां, सु-किङ्किणी-विराजिकाम् ।
सुबुद्धि-बुद्धि-दायिकां, सुरां सदा सु-पीयकाम् ॥६

स-क्लीं स-सौं स-सर्गकां, सनातनेश चाम्बिकाम् ।
स-सृष्टि-पाल-नाशिकां, प्रणौमि दीर्घ-केशिकाम् ॥७

सहस्र-मार्ग-पालिकां, परा-परात्म-भव्यकाम् ।
सुचारु-चारु-वक्त्रकाम्, शिवं ददातु भद्रिकाम् ॥८

॥ फल-श्रुति ॥

इत्येतत् परमं गुह्यं, पञ्च-चामर-संज्ञकम् ।
यो पठति च बालाग्रे, तस्य सिद्धिर्भवेद् ध्रुवम् ॥१

यं यं चिन्तयते कामं, तं तं प्राप्नोति साधकः ।
सिद्धिः कर-तले तस्य, मृते मोक्षमवाप्नुयात् ॥२

॥ श्रीचन्द्र-द्वीपावतारे श्रीकण्ठनाथ-विरचितं
श्रीबालायाः पञ्च-चामर-स्तवम् ॥



श्रीबाला मन्त्र-गर्भाष्टकम्

ऐंकार-रूपिणीं सत्यां, ऐंकाराक्षर-मालिनीम् ।
ऐं-बीज-रूपिणीं देवीं, बाला-देवीं नमाम्यहम् ॥१

वाग्भवां वारुणी-पीतां, वाचा-सिद्धि-प्रदां शिवाम् ।
बलि-प्रियां वरालाढ्यां, वन्दे बालां शुभ-प्रदाम् ॥२

लाक्षा-रस-निभां लेक्षां, ललज्जिह्वां भव-प्रियाम् ।
लम्ब-केशीं लोक-धात्रीं, बालां द्रव्य-प्रदां भजे ॥३

यैकारस्थां यज्ञ-रूपां, यूं-रूपां मन्त्र-रूपिणीम् ।
युधिष्ठिरां महा-बालां, नमामि परमार्थदाम् ॥४

नमस्तेऽस्तु महा-बालां, नमस्ते शङ्कर-प्रियाम् ।
नमस्तेऽस्तु गुणातीतां, नमस्तेऽस्तु नमो नमः ॥५

महा-मन्त्रां मन्त्र-रूपां, मोक्षदां मुक्त-केशिनीम् ।
मांसाशीं चन्द्र-मौलिं च, स्मरामि सततं शिवाम् ॥६

स्वयम्भुवां स्व-धर्मस्थां, स्वात्म-बोध-प्रकाशिकाम् ।
स्वर्णाभरण-दीप्ताङ्गां, बालां ज्ञान-प्रदां भजे ॥७

हा-हा-हा-शब्द-निरतां, हास्यां हास्य-प्रियां विभुम् ।
हुंकाराद् दैत्य-खण्डाख्यां, श्रीबालां प्रणमाम्यहम् ॥८

।। फल-श्रुति ।।

इत्यष्टकं महा-पुण्यं, बालायाः सिद्धि-दायकम् ।
ये पठन्ति सदा भक्त्या, गच्छन्ति परमां गतिम् ।।१

अश्वमेधादि-यज्ञानां, फलं कोटि-गुणं लभेत् ।
सत्यं सत्यं पुनः सत्यं, न देयं यस्य कस्यचित् ।।२

।। कुल-चूडा-मणि-तन्त्रे श्रीबालायाः मन्त्र-गर्भाष्टकम् ।।



श्रीबाला पंच-रत्न-स्तोत्रम्

ॐ आ-ई आनन्द-वल्ली अमृत-कर-तले आदि-शक्तिः परा-ई। मा-ई मायात्म-रूपी स्फटिक-मणि-मयी मा मतङ्गी षडङ्गी ।। ज्ञानी ज्ञानात्म-रूपी दलित-परिमले नाद-ओंकार-मूर्त्तिर्भोगी योगासनस्था भुवन-वश-करी सुन्दरी ऐं नमस्ते ।।१

माला-मन्त्री कटाक्षी मम हृदय-सुखी मत्त-भाव-प्रचण्डी। व्याला यज्ञोपवीता विकट-कटि-तटा वीर-शक्तिः प्रसन्ना ।। बाला बालेन्दु-मौलिर्मद-गज-गमना साक्षिका स्वस्ति-मन्त्री। काली कङ्काल-रूपी कटि-कटि-कटि-ह्रीं-कारिणी क्लीं नमस्ते ।।२

मूलाधारा महात्मा हुत-वह-सलिला मूल-मन्त्रा त्रिनेत्रा। हारा केयूर-वल्ली अखिल-प्रिय-करी अम्बिका इ अ आ ई ।। वेदा वेदान्त-नादे विनत-घन-मुखी वीर-तन्त्री-प्रचारी। सारा संसार-वासे सकल-सुख-करी सुन्दरी सौः नमस्ते ।।३

अध्यानी ध्यान-रूपी असुर-भय-करी आत्मना पाश-शोधी। प्रत्यक्षी पद्म-मूले प्रणत-बलकरी ब्रह्म-

विष्णु-त्रि-रूपी ।। शुद्धात्मा शुद्ध-रूपा हिम-किरण-निभा स्तोत्र-संक्षोभ-शक्तिः । सृष्टि-स्थित्यन्त-मूर्तिः त्रिपुर-हर-जयी सुन्दरी ऐं नमस्ते ।।४

ऐं क्लीं सौः ह्रीं ऐं क्लीं सकल-गुण-मयी सम्प्रदा-यात्म-रूपी । क्लीं ह्रीं श्रीं हिम-किरणयोर्ज्योति-रूपी प्रभावी ।। सौः क्लीं ऐं नवम-शक्ति-प्रणव-हर-मिते बिन्दु-नादात्म-कोटिम् । क्षां क्षीं क्षौं क्षुं क्षं-कार-नादे सकल-गुण-मयी सुन्दरी ऐं नमस्ते ।।५

अधरे विन्दु - मती सकलमखिल-सौभाग्य-रूप-सम्पन्ना । विद्या-धरमखिलमखिलं जपति त्रैलोक्य-मोहिनी बाला ।।६

सिन्दूर-पूर-तन्वी सुन्दर-वर्ण-वर्ण्या बालारुणारुणि-तमम्बरमादधाना । बाला प्रवाल-मधुराधर-बिम्ब-वेशा श्रीसुन्दरी वसतु मे हृदये सदैव ।।७

।। श्रीबाला-पञ्चरत्न-स्तोत्रं सम्पूर्णम् ।।

श्रीबाला-सूक्तम्

ॐ नमः श्रीबालायै । रुद्रोऽहं विष्णुरहं ब्रह्माऽहं अहङ्कारश्च दिगीशोऽहं पर्वतोऽहं समुद्रोऽहं च भूतोऽहं भविष्योऽहं वर्तमानोऽहं च प्रातर्मध्याह्न-सायं-कालोऽहं प्रहरोऽहं च स्वर्ग-मर्त्य-पाताल-चतुर्दश-भुवोऽहं ब्रह्मा उश्च सोम-सूर्याग्नि-पृथिवी-अप-वाय्वग्नि-तेजाकाशोऽहं । वैकारिका अहङ्कारोऽहं तेजसाहङ्कारश्च भूताहङ्कारोऽहं महारण्यश्च कर्मेन्द्रिय-ज्ञानेन्द्रियोऽहं दोष-दूष्य-ज्ञानेन्द्रि-यार्थे कर्मेन्द्रियार्थोऽहं विकृत्योऽहं प्रकृत्योऽहं विकारश्च कर्मेन्द्रियार्थोऽहं अन्तःकरणोऽहं हंसश्च । सुन्दरी-त्रिपुरा-बालाऽहं दश-महा-विद्याश्च गायत्री सावित्री सरस्वती त्रि - सन्ध्याऽहं पद्माश्च द्वादश चतुर्दश त्रय-त्रिंशत् शत-सहस्रायुत लक्ष-कोटि चाम्नायोऽहं षडाम्नायश्च एकाक्षरादि अयुताक्षर मन्त्रोऽहं जगद्योनिश्च सृष्टि-स्थिति-प्रलयोऽहं सर्व-भूतांश्च चार्वाक् सिद्धान्त तन्त्र-मेलक चार्वाकार्हन्ता नेत्रक सर्वाकाश्चाहं अजिनोऽहं व्योमोऽहं कौलोऽहं शैवश्च । सौर-गाणपत्य-वैष्णव-शाक्तोऽहं नास्तिकश्च तपोऽहं

योगोऽहं लय-विद्याश्च ब्राह्मण दूरापद-क्रम जटा चतुर्दश - विद्याऽहं गङ्गादि - नद्योऽहं सागराश्च अनुष्टु-भादि-छन्दोऽहं षट्-शास्त्रं च अहं नारदादि ऋषयः। त्रयस्त्रिंशत् कोटि-देवताश्च। अहं सर्वं यद्-भूतं यच्च भाव्यं जगद्-भोक्तारिति ऐं नमो बालायै। ये ध्यायि-तव्यं च स अहं सत्यं सत्यं ॐ।

॥ अथर्व-वेदोक्तं श्रीबाला-सूक्तम् ॥



श्रीबालोपनिषद्

ऐं नमः श्रीबालायै । श्रीबालोपनिषदं व्याख्यास्यामः, शृणु प्रिये ! ॥

चक्र-चक्रस्था, महात्मा, महा-गुह्या, गुह्य-तरा, श्रेष्ठाति-श्रेष्ठा, भव्या, भव्य-तरा, त्रिगुणगा, गुणातीता, गुण-स्वरूपा, गुङ्कार-मध्यस्था, रेचक-पूरक-कुम्भ-स्वरूपा, अष्टाङ्ग-रूपा, चतुर्दश-भुवन-मालिनी, चतुर्दश-भुवनेश्वरी, चत्वारि-वेद-वेदाङ्ग-पारगा, सांख्यासांख्य-स्वरूपा, शान्ता, शाक्त-प्रिया, शाक्त-धर्म-परायणा, सर्व-भद्रा, विभद्रा, सुभद्रा, भद्र-भद्रान्तर्गता, वीर-भद्रावतारिणी, शून्या, शून्य-तरा, शून्य-प्रभवा, शून्यालया, शून्य-ज्ञान-प्रदा, शून्यातीता, शूल-हस्ता, महा-सुन्दरी, सुरासुरारि-विध्वंसिनी, शूकरानना, सुभगा, शुभदा, सु-शुभा, शस्त्रास्त्र - धारिणी, परा - प्रासाद - वामाङ्गा, परमेश्वरी, पराऽपरा, परमात्मा, पापघ्ना, पञ्चेन्द्रियालया, पर-ब्रह्मावतारा, पद्म-हस्ता, पाञ्चजन्या, पुण्डरीकाक्षा, पशु-पाश-हारिणी, पशूप-पूज्या, पाखण्ड-ध्वंसिनी, पवनेशी, पवन-स्वरूपा, पद्मापद्म-मयी, पद्म-ज्ञान-प्रदात्री, पुस्त-

हस्ता, पक्व-बिम्ब-फल-प्रभा, प्रेतासना, प्रजा-पाली, प्रपञ्च-हारिणी, पृथिवी-रूपा, पीताम्बरा, पिशाच-गण-सेविता, पितृ-वनस्था, हसः-स्वरूपा, परम-हंसी, ऐंकार-वीजा, वाग्भवस्था, वाग्भव-वीजाद्योतिनी, वाग्भवेशी, वाग्भव-वीज-मालिनी । यः एवं वेद, स वेद-वित् ।।

।। फल-श्रुति ।।

बालोपनिषदं यो पठति, यो शृणोति, तस्याघ-सर्वं नश्यति, चतुर्वर्ग-फलं प्राप्नोति, लय-ज्ञानं भवति, ज्योतिर्मये प्रलीयति, षट्-कर्म-विद्या सिद्धयति, मनोरथं पूरयति, सर्वारिष्टं नाशयति, धनं एधति, आयु-वृद्धि-र्भवति, निर्वाण-पदं गच्छति, महा-जनत्वं प्राप्नोति, सर्व-शास्त्रं ज्ञायति, बहु-तर-सिद्धि नयति, डाकिन्यादि-सर्वं पलायति, ॐकारे प्रमीलति ।

।। अथर्व-वेदोक्तं श्रीबालोपनिषत् ।।

श्रीबाला शान्ति-स्तोत्रम्

॥ श्रीभैरव उवाच ॥

जय देवि जगद्धात्रि ! जय पापौघ-हारिणि !
जय दुःख-प्रशमनि, शान्तिर्भव ममार्चने ॥१
श्रीबाले परमेशानि ! जय कल्पान्त-कारिणि !
जय सर्व - विपत्तिघ्ने, शान्तिर्भव ममार्चने ॥२
जय विन्दु-नाद-रूपे, जय कल्याण-कारिणि !
जय घोरे च शत्रुघ्ने, शान्तिर्भव ममार्चने ॥३
मुण्ड-माले विशालाक्षि ! स्वर्ण-वर्णे चतुर्भुजे !
महा-पद्म-वनान्तस्थे, शान्तिर्भव ममार्चने ॥४
जगद्योनि महा-योनि, निर्णयातीत-रूपिणि !
परा-प्रासाद-गृहिणि ! शान्तिर्भव ममार्चने ॥५
इन्दु-चूड-युते चाक्ष-हस्ते परमेश्वरि !
रुद्र-संस्थे महा - माये, शान्तिर्भव ममार्चने ॥६
सूक्ष्मे स्थूले विश्व-रूपे, जय सङ्कट-तारिणि !
यज्ञ-रूपे जाप्य - रूपे, शान्तिर्भव ममार्चने ॥७
द्रुती-प्रिये द्रव्य-प्रिये, शिवे पञ्चांकुश-प्रिये !
भक्ति-भाव-प्रिये भद्रे, शान्तिर्भव ममार्चने ॥८

भाव-प्रिये लास - प्रिये, कारणानन्द-विग्रहे !
श्मशानस्य देव - मूले, शान्तिर्भव ममार्चने ॥९

ज्ञानाज्ञानात्मिके चाद्ये, भीति-निर्मूलन-क्षमे !
वीर-वन्द्ये सिद्धि-दात्रि, शान्तिर्भव ममार्चने ॥१०

स्मर-चन्दन-सुप्रीते, शोणितार्णव - संस्थिते !
सर्व-सौख्य-प्रदे शुद्धे, शान्तिर्भव ममार्चने ॥११

कापालिनि कलाधारे, कोमलाङ्गि कुलेश्वरि !
कुल-मार्ग-रते सिद्धे, शान्तिर्भव ममार्चने ॥१२

॥ फल-श्रुति ॥

शान्ति-स्तोत्रं सुख-करं, बल्यन्ते पठते शिवे !
देव्याः शान्तिर्भवेत् तस्य, न्यूनाधिक्यादि-कर्मणि ॥१

श्मशाने च त्रिधा पाठात्, महा-रोगो विनश्यति ।
पञ्चधा पठते भद्रे, सर्व - दुःखं पलायते ॥२

मन्त्र-सिद्धि-कामनया, दशावर्त्यं पठेद् यदि ।
मन्त्र-सिद्धिर्भवेत् तस्य, नात्र कार्या विचारणा ॥३

पञ्चमस्य समायोगे, पठते स्तोत्रमुत्तमम् ।
सिद्ध्यन्ति सकला विद्या, खेचर्यादिका सत्वरम् ॥४

(शेष पृष्ठ ८४ के नीचे)

श्रीबाला-पटलम्

॥ पूर्व-पीठिका ॥

कैलास - शिखरासीनं, भगवन्तमुमा - पतिम् ।
चन्द्रार्ध - मुकुटं देवं, सोम-सूर्याग्नि-लोचनम् ॥१
गज-चर्म-परीधानं, विरूपाक्षं सुरार्चितम् ।
गण - गन्धर्व - यक्षेन्द्र - देवासुर - नमस्कृतम् ॥२
विहसन्तं जपन्तं च, पठन्तं च मुहुर्मुहुः ।
उत्थाय प्रणता भूत्वा, चेदं पृच्छति भैरवी ॥३

॥ श्रीभैरवी उवाच ॥

भगवन् करुणाम्भोधे ! सर्वागम-विशारद !
त्वत्-प्रसादान्मया सर्वाः, श्रुता विद्याः सुरेश्वर !॥४

(पृष्ठ ८३ का शेष)

चन्द्र-सूर्योपरागे च, पठेत् स्तोत्रमुत्तमम् ।
बाला सद्मनि सौख्येन, बहु-कालं वसेत् ततः ॥५
सर्व - भद्रमवाप्नोति, सर्वत्र विजयी भवेत् ।
तीर्थ-कोटि-गुणं चैव, दान-कोटि-फलं तथा ।
लभते नात्र सन्देहो, सत्यं सत्यं मयोदितम् ॥६

॥ श्रीचिन्तामणि-तन्त्रे श्रीबालायाः शान्ति-स्तोत्रम् ॥

इदानीं श्रोतुमिच्छामि, बालां त्रिपुर-सुन्दरीम् ।
देयाऽस्ति यदि मे देव ! वद विद्यां महेश्वर ! ॥५

॥ श्रीभैरव उवाच ॥

शृणु देवि ! प्रवक्ष्यामि, पञ्चाङ्गं साधकेष्टदम् ।
पटलं पद्धतिं वर्म, तथा नाम्नां सहस्रकम् ॥६
स्तव-राजं महा-देवि ! शृणुष्वैकाग्र-मानसा ।
श्रीबाला परमेशानी, भुक्ति-मुक्ति-प्रदायिनी ॥७
राज्यं देयं शिरो देयं, गृहं लक्ष्मी-युतं तथा ।
सर्वं देयं महेशानि ! न देयमिदमुत्तमम् ॥८
अस्या विद्यायाः सदृशी, विद्या नान्या कलौ युगे ।
श्रीबाला त्रिपुरा विद्या, शीघ्रं सिद्धि-प्रदा स्मृता ॥९
देया शिष्याय शान्ताय, गुरु-भक्ति-रताय च ।
नाभक्ताय प्रदातव्या, विद्येयं परमेश्वरि ! ॥१०
मन्त्रोद्धारं तथा यन्त्रं, प्रस्तारं ध्यानमेव च ।
प्रयोगान् सम्प्रवक्ष्यामि, देव-देव्या महेश्वरि ! ॥११
प्रथमं शृणु देवेशि ! मन्त्रोद्धारं फल-प्रदम् ।
गोपनीयं प्रयत्नेन, येन सिद्धिः प्रजायते ॥१२
वाग्भवं काम-राजश्च, शक्ति-मध्येऽभिधं न्यसेत् ।
नमोऽन्ते देवि ! बालाया, मन्त्रोऽयं चाष्ट-वर्णकः ॥१३

नापि विघ्नो न वाशौचो, न वार-नियमस्तथा ।
स्वयं सिद्धो महा-देवि ! मन्त्र-राजः कलौ युगे ॥१४
दक्षिणामूर्ति-पंक्त्यौ च, मुनिश्छन्दः क्रमात् स्मृतम् ।
देवता त्रिपुरा बाला, आद्यन्ते वीज-शक्तिके ॥१५
क्लीं कीलकं समादिष्टं, धर्म-कामार्थ-मुक्तये ।
शिरसि वदने देवि ! हृदये गुह्य-देशके ॥१६
पादयोर्नाभि-कमले, सर्वाङ्गे च तथा न्यसेत् ।
ऋष्यादिकं महा-देवि ! कुर्यान्न्यास-विकल्पनम् ॥१७
कर-न्यासं षडङ्गं च, बीजैः कुर्यान्महेश्वरि !
अस्या ध्यानं प्रवक्ष्यामि, साधकानां हित-प्रदम् ॥१८

रक्ताम्बरां चन्द्र-कलावतंसाम्,
समुद्यदादित्य-निभां त्रिनेत्राम् ।
विद्याऽक्ष-मालाऽभय-दान-हस्ताम्,
ध्यायामि बालामरुणाम्बुजस्थाम् ॥१९

इति ध्यात्वा महा-देवीं, जपेन्मन्त्रं सु-सिद्धिदम् ।
लक्ष - त्रयं पुरश्चर्या - विधौ साधक - सत्तमः ॥२०
अथ वक्ष्यामि देवेशि ! यन्त्रोद्धारं सु-दुर्लभम् ।
साधकस्य महा-देव्या, भुक्ति-मुक्ति-फल-प्रदम् ॥२१

विन्दु-त्रिकोण-वसु-कोणक-नाग-पत्र—
वृत्त-त्रयाञ्चित-मही-सदन-त्रयं च ।

बालादि-चक्रमिदमार्ति-हरं गिरीशे !
ब्रह्मेन्द्र-विष्णु-नमितं गदितं मया ते ॥२२
एवं विलिखिते यन्त्रे, पीठ-शक्तीः प्रपूजयेत् ।
इच्छा-ज्ञान-क्रियाश्चैव, कामिनी काम-दायिनी ॥२३
रती रति-प्रियाऽऽनन्दा, मनोन्मन्यपि वान्तिमा ।
पीठ-शक्तीरिमा इष्ट्वा, पीठं तन्मनुना दिशेत् ॥२४
व्योम-पर्वत-तार्तीयं, सदा - शिव - महा - पदम् ।
पीठ-पद्मासनायान्ते, नमोऽन्तः पीठ - मन्त्रकः ॥२५
षोडशार्णस्ततो मूर्तौ, क्लिप्तायां मूल-मन्त्रतः ।
आवाह्य पूजयेद् देवीमुपचारैः पृथग् - विधैः ॥२६
देवीमिष्ट्वा मध्य-योनौ, त्रिकोणे भक्ति-पूर्वकः ।
वाम-कोणे रतिं दक्षे, प्रीतिमग्रे मनोभवाम् ॥२७
योन्यां तु वह्नि-कोणादावङ्गानि परिपूजयेत् ।
मध्य-योन्यां बहिः पूर्व-दिक्षु चाग्रे स्मरान्नपि ॥२८
बाण - देवीस्तद् - वदेव, शक्तीरष्टासु योनिषु ।
सुभगाख्या भगा पश्चात्, तृतीया भग-सर्पिणी ॥२९
भग - माला तथाऽनङ्गाद्यानङ्ग - कुसुमा परा ।
अनङ्ग - मेखलाऽनङ्ग - मदनेत्यष्ट - शक्तयः ॥३०
पद्म - केसरगा ब्राह्मी - मुखाः पत्रेषु भैरवाः ।
दलाग्रेऽप्यष्ट-पीठानि, काम - रूपाख्यमादिमम् ॥३१

मलयं कौल-गिर्याख्यं, चौहाराख्यं कुलान्तकम् ।
जालन्धरं तथौड्याणं, देव - कूटमथाष्टमम् ॥३२
भू-गृहे च धरा-दिक्षु, हेतुकं त्रिपुरान्तकम् ।
वेतालमग्नि-जिह्वं च, कालान्तक - कपालिनौ ॥३३
एक-पादं भीम-रूपं, मलयं हाटकेश्वरम् ।
शक्राद्यानायुधैः सर्वैः, स्व-स्व-दिक्षु समर्चयेत् ॥३४
तद्-बहिर्दिक्षु वटुकं, योगिनीः क्षेत्रपालकम् ।
गणेशं विदिशासु वै, वसून् सूर्यं शिवं तथा ॥३५
सर्व-भूतान् समभ्यर्च्य, पूजयेदायुधांस्तथा ।
बालां मध्ये विभाव्यादौ, कामेश्वराङ्क-मध्यगाम् ॥३६
मकारैः पञ्चभिः कौलः, कौलाचार-परायणः ।
सम्पूजयेन्महा-देवि ! साधको मन्त्र - साधकः ॥३७
विन्दौ गन्धाक्षतैः पुष्पैर्धूप-दीपादि-तर्पणैः ।
लयाङ्गमिदमाख्यातं, प्रयोगान् शृणु पार्वति ! ॥३८
यान् विधाय मनुः शीघ्रं, सिद्धि-भाग् भवति ध्रुवम् ।
स्तम्भनं मोहनं चैव, मारणाकर्षणे तथा ॥३९
वशीकारं तथोच्चाटं, शान्तिकं पौष्टिकं तथा ।
एतत् साधनमाचक्षे, सार - भूतं मनोः प्रिये ! ॥४०
अदेयं देव्यभक्ताय, गोप्यं गुह्य - तमं पशोः ।
प्रतिपद्-दिवसे देवि ! स्नात्वा कृत्वाह्निकीं क्रियाम् ॥४१

मध्याह्ने निर्जनं गत्वा, यथावदयुतावधि ।
होमो दशांशता कार्यो, घृत - पायस - बर्हकैः ॥४२
सन्तर्प्य देवताः सद्यः, स्तम्भनं जायते ध्रुवम् ।
राज-सूर्येन्दु-वातानां, दस्यु - वादि - मुखेषु च ॥४३
दर्शे सायं श्मशाने तु, जपेदुलूक-विष्टरः ।
अयुतं तद् - दशांशेन, होमं सर्पिस्सुरान्वितैः ॥४४
कण-केसर-पद्माक्षैर्मोहनं जगतां भवेत् ।
भूताख्ये वासरे देवि ! गत्वा प्रेतालयं निशि ॥४५
चिताग्रे संजपेद् विद्यां, वीरेन्द्रः षोडशाक्षरीम् ।
अयुतं च हुनेन्मन्त्री, चिताग्नौ घृत-गुग्गुलम् ॥४६
चाण्डाल - केश - सहितं, म्रियते रिपुरुत्कटः ।
अष्टम्यां शुक्ल-पक्षे तु, जपेद् रहसि साधकः ॥४७
अयुतं मूल-विद्याया, ध्यात्वा कान्तां मनोगताम् ।
होमो दशांशतः सर्पिर्लाक्षा-पुष्पवती-रजः ॥४८
करीर-पूल-गोधूमैः, स्त्रीणामाकर्षणं भवेत् ।
नवम्यां साधकः स्नात्वा, कृत्वा कर्माह्निकं प्रिये ! ॥४९
अयुतं घृत-मत्स्याण्ड-पद्म-सुक्तैण-रोमभिः ।
होमो विधेयो वरिशैर्वासवो दासतां व्रजेत् ॥५०
चतुर्थ्यां कृष्ण-पक्षे तु, जपेच्चन्द्रोदये शिवे !
नदी-तीरे मनुं वीरोऽयुतं शीर्षासन-स्थितः ॥५१

दशांशेन हुनेत् तत्र, घृत-नीलोत्पल-त्वचः ।
लवङ्ग-मरिचाम्लादीन्, रिपोरुच्चाटनं भवेत् ॥५२
पञ्चम्यां निशि देवेशि ! जपेदयुत-संख्यया ।
हुनेद् दशांशतः सर्पिर्मत्स्य - मत्स्याण्ड-खर्परान् ॥५३
महाऽमय - महा - भीति - महोपद्रव - शान्तये ।
महाऽष्टम्यां नरः स्नात्वा, पीठे श्रेष्ठे दशाधकाम् ॥५४
वीरो दशाङ्क-साहस्रीं, हुनेत् तत्र दशांशतः ।
घृत-खर्जूर-मृद्वीका - नाग - वल्ली - दल - स्रजः ॥५५
छाग-मांसं स-रक्तं च, महा-पुष्टिः प्रजायते ।
इदं रहस्यमाख्यातं, सर्व-तत्त्व-निरूपणम् ॥५६
सर्वस्वं मम देवेशि ! रहस्यं गोपयेत् कलौ ।
सूर्यादि - वारेषु जपैर्दश - साहस्र - संख्यकैः ॥५७
सर्व-सिद्धिमवाप्नोति, नात्र कार्या विचारणा ।
इत्येष पटलो दिव्यः, स्नेहात् तव प्रकाशितः ॥५८
गोप्याद् गोप्यो गोप्य-तरो, गोपनीयः स्व-योनि-वत् ॥५९

॥ श्रीरुद्रयामले तन्त्रे भैरव-भैरवी-सम्वादे
श्रीबाला-त्रिपुर-सुन्दरी-पटलः ॥

श्रीबाला-त्रिशति-स्तोत्रम्

अस्याः श्रीपरा - बाला - त्रिपुरा त्रिशति-स्तोत्र-मन्त्रस्य श्रीआनन्दभैरवो ऋषिः, श्रीपरा-विद्या-भगवती अनन्त-नायिका श्रीबाला-त्रिपुरा देवता, गायत्र्यनुष्टुप् छन्दः, ऐं बीजं, सौः शक्तिः, क्लीं उत्कीलनं, मायाऽऽवरणं, चतुर्वर्गाप्तये प्रयोगः ।

मन्त्र-वर्णैं षडङ्गः ।

॥ ध्यानम् ॥

समुद्यदादित्य - पराङ्क-संख्यका-
माभान्वितां रक्त-प्रभां च दिव्याम् ।
विद्याक्ष-माले त्वभयं वरं च,
विश्वेषु दात्रीं परमाम्बुजां भजे ॥

॥ त्रिशति-स्तोत्रम् ॥

बाला बलाऽबला माला, श्रीबाला बाल-रूपिणी ॥
बालिका शालिनी शाला, तारिणी तरणेश्वरी ॥१
श्रीश्यामा गौरी सुप्रीता, प्रीता पीता परात्परा ।
शैलिनी शैलजा माता, सुकेता सोम-धारिणी ॥२
सोमदा पुष्पिणी पुष्पा, मकरन्दा परागया ।
पोषिणी विधिदा विद्या, महा-विद्या पराङ्कजा ॥३

पूर्णा दश-मयी माया, दशा विद्या महोक्षजा ।
दशा दश-मयी प्रज्ञाऽमोघाऽमोघ-शासना ।।४
पुष्पिणी प्रथमा भद्रा, विद्याक्षाऽक्ष-धारिणी ।
त्र्यक्षाक्षा पुष्प-पक्षाऽक्षा, मीनाक्षा काम-सुन्दरी ।।५
कामाक्षा मदनाक्षा श्रीः, श्रीविद्या षोडशी सती ।
विद्या पञ्च-दशी पञ्चा, पञ्चानन-प्रिया प्रभा ।।६
रक्त-वस्त्र-धरा रक्ता, रक्ताभा रक्त-मालिनी ।
रक्तासन - समासीना, रजा सत्त्वा तमाश्रया ।।७
गुण-त्रयासना दिव्या, सर्वाभरण - भूषिता ।
सर्वा सर्व-प्रगा खर्वाऽर्वा च सर्व-प्रदायिनी ।।८
बलि-प्रीता बलिस्स्फोता, बल्यर्चन-विधौ स्मिता ।
सर्व-काम-प्रदा मुक्ता, मुक्तेशी मोक्ष-दायिनी ।।९
पर्ण-गेहा प्रिय-प्रीता, पर्ण-गेह-निवासिनी ।
मणि-गेह-प्रदा मण्या, कौस्तुभा दिव्य-कारिका ।।१०
चिन्ता-मणिश्चिन्तनीया, चिता चिन्ता पराऽपरा ।
मृत्युञ्जय-सखी रामा, रमा रज्जुर्र-बीजपा ।।११
राजेश्वरी महा - माया, महा - कर्त्री कृतार्थदा ।
कृतार्था कण्ठजा विद्या, कमठा केलि कालिका ।।१२
केलिर्केलि-मयी कुल्ला, कुरु-कुल्ला कला-मयी ।
कलान्ताऽन्तर्कला प्रीता, पूर्णेशी पारद-प्रभा ।।१३

पालिनी पोषिणी पूर्वा, पूर्वजा पूर्व - पूर्वजा ।
पङ्क्तेशी पञ्चमाशा, साऽऽनन्दैक - प्रदा परा ॥१४
हंसा हंसेश्वरी मुग्धा, मोहदा मोह-लक्षणा ।
मोहेश्वरी महा-माया, मल्लिकेश - प्रपूजिता ॥१५
मल्लिकार्जुन - मोहेशी, मल्लिकार्जुन - सेविता ।
मल्लिकार्जुन-सम्प्रीता, सर्वान्ता श्रीश्रिय-प्रदा ॥१६
देव-राज-समाराध्या, सर्व - देव - प्रियङ्करी ।
स्पन्दजाद्या महाऽऽद्याद्या, पूर्ण-ब्रह्मेश्वरीश्वरी ॥१७
शिवाराध्या चेश्वरेशी, सा सर्वाङ्गा सङ्गमेश्वरी ।
सङ्गमा सङ्गजा सारा, सङ्गमेश्वर - सेविता ॥१८
सागरा सार-सोमेशाऽमृता पीयूष-पानपा ।
शान्ता च घूर्णिताऽघोरा, विह्वला मदया मदा ॥१९
महाऽऽनन्दा विशालाक्षी, पूर्णानन्द-प्रदायिनी ।
श्रीकृष्णा कृष्ण चावेशी, कृष्ण-मुक्त-कराऽमला ॥२०
पक्षानन्द-प्रदा पक्षा, श्वेत-कृष्णाऽक्षराऽक्षरा ।
वर्ण-बीजाक्षरी माला, विश्व-बीजा महेश्वरी ॥२१
ऋद्धि-सिद्धि-मयी श्रद्धा, ऋद्धि-सिद्धि-सनातनी ।
पूर्णा परेश्वरी सिद्धा, सिद्धि-माता स्वरेश्वरी ॥२२
सनकानन्द-सन्देशा, सा सनन्दात्म - काशदा ।
सनातना खण्डदा सिद्धिः, सनत्-साधन-साधना ॥२३

श्रीशिवा शङ्कराऽशेषा, वृद्धाऽशेषाऽपि कन्यका ।
शून्या शून्माति-रोमाभा, चाशून्या शून्य-सुन्दरी ॥२४
शून्याऽपि सा पराभासा, भावना भास-भासिनी ।
अरूपा रूपयाऽनन्ताऽपारा सा रूप - सुन्दरी ॥२५
पूर्णा चापरा विद्या, परा पूर्णा परेश्वरी ।
काला काल-मयी सिद्धा, काली कर्ण-वर-प्रदा ॥२६
आशा संक्षोभिणी माया, षोडशी मोहिनी महा ।
श्रीनाथोपासिता प्रज्ञा, श्रीशिवोपासिता क्रिया ॥२७
त्रि-मयी पौरुषी माया, श्रीदुर्गा धारिणी कला ।
माता च मायिता भावाऽलङ्कारा भोगदा प्रिया ॥२८
पाणेशी जीवना मृत्युर्यमेशी मोक्षदा शिवा ।
कुमारी कुलजा कल्या, कृष्ण-कल्याण-कारिणी ॥२९
अञ्जना अञ्जनेशी च, अञ्जनेश-प्रियङ्करी ।
मयूरा मुरली-पूरा, पक्ष-प्रीता स-पक्षिणी ॥३०
उन्मनी चोन्मनी प्रीता, सोन्मनी परदा परा ।
सौम्येशी च सदा शान्ता, शान्त्यनन्ता करालिनी ॥३१
विश्वाम्बा विश्वजा पुण्या, पुण्य-क्षेत्रा महा-यशा ।
महा-पुण्य-करी कृत्या, कर्महा कर्मदा मुदा ॥३२
अनिलाऽनल-रूपा सा, जला जालाऽधरा धरा ।
शर्मदा नर्मदा नित्या, नित्य-रूपा महा-प्रभा ॥३३

अर्बुदा चार्चन - परा, अर्चनानन्द-वर्द्धिनी ।
विश्वार्चन-पराऽलिङ्गा, लिङ्ग-ज्ञानाङ्ग-चार्चिका ।।३४
वेदिनी वेददा विद्या, सर्व-ज्ञान-प्रकल्पिनी ।
जालाकर्षिणी विश्वेशी, विश्व-कर्षिणी तोषिणी ।।३५
तोषिणी पोषिणी कोषा, कोषदा कोष-रक्षिणी ।
विद्या कोष-मयी कोषा, कर्षिणी कोष-वर्द्धिनी ।।३६
सम्वेदा विश्व-विज्ञाना, सम्वित्-पर-प्रदाऽनघा ।
कलि-कल्मषहा ज्ञाना, सुन्दरी सुन्दरेश्वरी ।।३७
बलि-बुद्धि-करी प्रज्ञा, बलि-बुद्धि-विवर्द्धिनी ।
बल्याश्रय - प्रदाऽमोघा, बलि-प्रज्ञा-प्रचोदिनी ।।३८
ऐं क्लीं सौः मन्त्र-वर्णा सा, मन्त्र-माताऽमृता सती ।
यन्त्रा यन्त्री महा-तन्त्रा, तन्त्री मन्त्र-फल-प्रदा ।।३९
सर्व-मन्त्र-स्वरूपा सा, यन्त्रेषी यन्त्र-नायिका ।
सोहं हंसः-स्वरूपा सा, अन्तर्विज्ञानदा प्रभा ।।४०
श्रीं ह्रीं क्रीं भासना शक्तिरलङ्कारात्मगा प्रगा ।
महा-विद्या परा पूर्णा, दशा-रूपा दशेश्वरी ।।४१
क-ए-इ-ल महा-माया, ह-स-क-ह-लात्म-नालिका ।
सकला सा परा माया, एक-तन्त्रात्म-नायिका ।।४२
रसा रस-मयी बाला, रस-पूर्णा रसेश्वरा ।
रसेश्वर - परा पूर्णा, रहस्यात्मा महेश्वरी ।।४३

अलक्ष्या लक्ष्यदा लक्ष्या, अलक्ष्याऽऽनन्ददा शुभा ।
निरञ्जना निरासीना, नक्षत्रा मण्डलाधिका ॥४४
विश्व-मण्डल-सङ्काशा, काशदा काश-नायिका ।
सर्व-विश्वेश्वरी मुक्ता, मुक्ता-हार-प्रिया स्वधा ॥४५

॥ फल-श्रुति ॥

इत्येत् परमं गुह्यं, त्रिंशति - स्तोत्रमुत्तमम् ।
बाला-त्रिपुर-सुन्दर्याः, भुक्ति-मुक्ति-प्रदं नृणाम् ॥१
यः पठेत् सततं नित्यं, पूजा-काले समाहितः ।
प्राप्नोति परमां सिद्धिं, सत्यं सत्यं न संशयः ॥२

॥ श्रीबाला-त्रिपुरा-त्रिंशति-स्तोत्रम् ॥



श्रीबाला-चरणाष्टकम्

जयन्ति विघ्नौघ-तमघ्न-मानवः,
सुरासुराधीश - किरीट - भूषणाः ।
श्री-शुक्ल-रक्षा - व्रत - तत्पराः मुदा,
बाला-पद-द्वन्द्व-विशाल - रेणवः ॥

पुनीते लाक्षाक्ते ह्यरुण-कमलोर्ध्वासन-वृते,
ध्वजैः पद्मैर्दिव्यैर्यव-कुसुम-मालाङ्क-सहिते ।
सुरेशैर्लोकेशैर्नृप-ऋषि-मुनीन्द्रैः सु-नमिते,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥१

समस्तं तन्त्रं नो स्तवनमपि मन्त्रं सु-विमलम्,
न यन्त्रं पूजां च तव जननि ! जाने सु-विधिना ।
मदीयोऽयं बालः परम-करुणा - पूर्ण-हृदये,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥२

स्व-भक्तेभ्यो सद्यो विविध-फल-दानैक-निपुणे,
जगत्-पूज्ये सेव्ये हरि-हर-महेन्द्र-प्रभृतिभिः ।
रणन्मञ्जीरेऽस्मिन् विविध-मणि-मुक्तावलि-युते,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥३

ददाने दीनेभ्यो बहुल-धन-सम्भार-भरणम्,
रती-रम्भेन्द्राणी-सुर-युवतिभिर्मानस-कृते ।
नखैरर्धाकारैर्विधु - विमलभाभिर्विलसिते,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥४

अमुष्मिन् वंशे मे जननि ! बहु-बाला-प्रभृतयः,
कवीन्द्रो विद्वांसो नृप-वर-किरीटार्चित-पदाः ।
बभूवुस्तेषां च सकल-विधि-रक्षा-व्रत-परे,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥५

समन्तात् पापानां निज-जननि ! पारं न गतवान्,
स्व-स्वार्थोन्मत्तोऽहं तव विमल-पूजा-विरहितः ।
समस्तं ज्ञात्वेत्थं तदपि करुणा-पालन-करे,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥६

सदा दीनं मातर्विविध-परितापैः परिवृतम्,
कुतर्केष्वभ्यस्तं ह्युदर-भरणोपाय-विधुरम् ।
न सक्तं सेवायां तदपि दधाने स्वशरणे,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥७

न याचे साम्राज्यं हरि-हर-पदं नापि सकलम्,
न वैराग्यं मोक्षं विपुल-धन-धान्यौघममलम् ।
परं याचे मातर्निज-सकल-दुःखैक-दलने,
पदाब्जे बालायाः मम मन-मलिन्दो विहरतु ॥८

॥ फल-श्रुति ॥

बालाऽष्टकं पठति यः प्रयतस्त्रि-कालम्,
'बद्रीप्रसाद' - तनयेन कृतं विशालम् ।
तस्य गृहे धन-सुतादि-समस्त - कामान्,
ऐश्वर्य्य-भोग-विविधान् प्रददाति बाला ॥१

रावतपुरे भासित - दिव्य - मूर्तिम्,
स्व - पूर्वजाराधित - पाद - पङ्कजाम् ।
रक्तारविन्दासन - संस्थितां ताम्,
ध्यायामि बालां त्रिपुराख्य - सुन्दरीम् ॥२

बदरी-सूनुना स्वेष्टम्, सधारी-सुकुलेन च ।
कृतं बालाऽष्टकं दिव्यं, बाला-चरणयोरर्पितम् ॥

॥ श्रीबाला-चरणाष्टकं सम्पूर्णम् ॥

श्रीबाला महिम्न-स्तोत्रम्

प्रबद्धोऽयं वत्सो जननि ! तव नागेन्द्र-चरणे,
स एवाऽयं नागो व्रजति तरसा कण्टक-वने ।
व्रणास्तैः सम्भूता रुधिर-वमना दंश-वशगा,
इमां सूनोर्दृष्ट्वा किमु हरसि न ग्रन्थिमखितः ।।१

ज्वलन्तं सम्पश्यन् जनक-जननी दृष्टि-विषये,
हुताशं क्रीड़ायै व्यवहरति बालो यदि भवे ।
दया-भावाऽशोधी हुत-भुगशित स प्रलपति,
तदाऽशक्तेर्दोषं जननि ! मनुजः कस्य कथयेत् ।।२

ततः क्रीड़ाऽऽसक्तः प्रथम-वयसि ज्ञान-विरतो,
युवत्वे सम्प्राप्ते युवति-विषयाऽऽसक्त-हृदयः ।
सुतानामुत्पत्तिं भजति मनसा वृत्ति-बलतः,
प्रपञ्चोऽयं नित्यस्त्वव जननि ! दुर्वार उदितः ।।३

क्व कर्मत्व-ज्ञानं स्पृशति जननि ! प्रागवसरे,
समास्नाते मूत्रैरधिगत-पुरीषोत्सव-गृहे ।
महत्त्वे तेनाऽऽसे कथमिह सुकर्माचरणवान्,
विकाराप्ते त्वस्मिन् हरति नहि स प्राप्त-विभवं ।।४

प्रसूतीनामेको यदपि सुधियां नीच-पथगः,
भवेत् सूनुस्तस्य त्यजति जनकः स्नेहमतुलम् ।
प्रसू-प्रीतेस्तेषु कुमति - सुमतिष्वेव समता,
यतस्तेषां साम्यं जनन-समयस्यापि सदृशम् ॥५
जरायौ मे जाता नग-पति-सुतेऽनेक-विधिना,
निवासास्वत्-पादाभ्यसन-विधि-शून्येन फलिताः ।
तदुत्पीडा-ग्रस्तः प्रलपित-मनाः पङ्कज - पदम्,
त्वदीयं ध्यायामि क्षिति-निरत-चित्तस्य विरतेः ॥६
महत्त्वं तेऽपर्णे ! चरण-नलिनोर्देव - गुरुभि—
रसाध्यं सर्वज्ञैरपि निगदितं मातरविदः ।
मनीषा चैतस्य कथमनुचरेन्मोक्ष - पदवीम्,
त्वदङ्घ्रि-द्वन्द्वस्य स्तुतिममर-वाक्याश्रितवतीम् ॥७
निषिध्यादौ रूपं तव जननि ! वेदान्त-निरताः,
परे प्राहुर्मातर्भव-विधि-निदानं तव वपुः ।
विधाता भूतेशः खग-पति-पतिश्चापि विमले,
भवत्याः सञ्जाता नग-पति-सुते ! गायति परः ॥८
इदानीं त्वां स्तोतुं कथमनुभवेयं त्रिनयने,
विभीतात्मा-वृत्तौ बहु-विध-रुचि-ग्रस्त-हृदये ।
स्थिता बुद्ध्याकारा त्वमसि मनुजानां मनसि वै,
अतो निन्द्य-स्तोत्रे तव जननि ! यत्नोऽयमपि मे ॥९

यदीयैक्यस्यैवाऽप्यनुसरणमिच्छन्ति बहवो,
विनिन्द्यानुग्राह्यं नगपति-सुते ! तस्य सहसा ।
कथं ते तद्-रूपा इति मम मनोऽनिश्चित-परम्,
यतोऽद्वैतं प्राहुः श्रुति-विहित-मार्गं श्रुति-विदः ॥१०

विधाता तार्क्ष्येशो विषधर-पतिः काल-कलनः,
त्रिकाल-ज्ञातारः कमल-जनि-पुत्राश्च मघवा ।
स्थिताश्चान्ये देवाः सदसि खलु दक्षस्य बहवो,
विधातुः सत्रस्य क्षिति-धर-सुते ! तस्य सहसा ॥११

शिरश्छेदो जातस्तदपि शिव - शूलेन महता,
तिरस्कारस्यापि प्रतिहत-गिरा किन्तु लभते ।
प्रलम्बित्वात् सत्यामृतमिति पद-प्राप्ति-विषयाम्,
किमन्यूनां मत्वा सकल-भुवनोदार-रचनाम् ॥१२

त्वदीयं पादाब्जं हृदय-कमले यस्य रमते,
स एवं ते रूपं मुनि-वर-चय-ध्यान-विषयम् ।
निदानं दीक्षाया विधि-हरि-शिवानां च गिरिजे !
उपेतं तल्लिङ्गैरनु-वदति ते भक्ति-निरतः ॥१३

सदा सेव्यं मातश्चरण-युगलं ब्रह्म-पथगै—
स्त्वदीयं सेवेऽहं रचित-मणिपीठेऽर्पित-तलम् ।
नख-ज्योत्स्नाऽऽक्रान्ते सुर-पति-किरीटानुकरणे,
भवऽऽवृत्ति-ध्वंसं प्रणमित-तरं देव-गुरुभिः ॥१४

चिदानन्दाकारे ! तव चरण-सेवाऽमृत-रसम्,
पुरश्चारी धर्मः पिवति खलु लोकेऽपि निरतः ।
समर्थो देवेन्द्राऽऽस्पद - गमन - दाने दुरितहा,
भवत्या निर्दिष्टो भ्रमर-समया भू-लतिकया ।।१५

विभूतिं त्वद्-भक्तस्तव चरण-पङ्केरुह-भवाम्,
दुरापा मन्यैश्च स्वपन - वसु-गर्भां त्रि - नयने !
सु-रक्ष्यां विश्वेशैः सुर-हृदय-तात्-पाप-नुदयाम्,
विभुञ्जानः कामं भवति मनुजैर्वन्द्य-चरणः ।।१६

भ्रमन्तालि - द्वन्द्वाऽमृत-जनि-मुखीनां तव जनः,
सुधा-वीची-वाचां मृग-पति-कटीनां प्रति-दिनम् ।
घन - प्रायाकारस्तन - युग - धराणमविकलम्,
विलासी नारीणां करि-वर-गतीनां भवति सः ।।१७

भवानि ! त्वत्-तूर्यास्पदमखिल-वेदैर्विरचितम्,
तदुद्भूतैः रुद्धं ध्वनिभिरति - सूक्ष्मैश्च नितराम् ।
अनेकत्वैकत्वानवगम - तिरस्कार - विषयम् ,
विशुद्धाऽऽनन्दार्णे अभि-निवेशति ध्यान-निरतः ।।१८

मुकुन्द-ब्रह्मेन्द्र - त्रिनयन - सुराणां फल-वताम्,
भवत्-पूजा मातस्त्रिगुण-विहिता स्वात्म-सदृशी ।
त्वदुद्देश्ये यश्चेद् भवति ननु सत्त्व-प्रसविका—

मतस्त्वां कल्याणीं प्रणिगदति कश्चित् तव जनः ॥१९
विहार - प्रासादस्तव जननि ! पङ्केरुह-पदोः,
परिच्छेत्तुं शक्यो विधि-मुर-रिपुभ्यां नहि यतः ।
अतस्त्वां सु-स्नातां त्रिगुण-मलतोऽदृष्ट-वपुषी,
शिवेति त्वत्-सेवी भव-जलधि-तीर्णः शिव-वपुः ॥२०
त्रयो ब्रह्माद्यास्ते कथमपि गता ध्वस्त-पशवः,
स्मरन्तस्ते वाणीं सुर-पद-सु-गुप्तां तव पदम् ।
ततो द्वार-स्थायी नव-शिशुतरस्त्वद्-बल-जयी,
अभूत् प्राहुर्दुर्गे ! स्व-जन-सुलभां त्वां मुनि-वराः ॥२१
समुद्राशी दृक् ते हुत - भुगभिधोऽनन्त-महिमा,
चतुर्लक्षं क्रोशे तमुपरि विभाति ग्रह-पतिः ।
ततश्चोर्ध्वे चन्द्रोऽमित-गमन-शीलो द्वि-गुणिते,
तृतीयांशस्येयं तव जननि ! मौलेश्च गुरुता ॥२२
अहो ! ब्रह्मादीनां वयस उदयास्तौ तव दृशौ,
कटाक्ष - प्रक्षेपोद्गमन - पवनोद्भूत - रथिनौ ।
विरुद्धांशु - कामं सकल - भुवनाधार - वपुषी,
समुन्नेया दिव्या स्थित-महिम-देहा तव जनैः ॥२३
विवेकस्ते कोऽयं गिरि-पति-सुते ! पाप-मनसाम्,
यम-त्रास-त्राणा भवसि बलतस्तेभ्य इति च ।
अनिच्छद् भूयः श्रेयः सपदि ददसि प्रार्थित इव,

किमन्यत् ते शीलं लघु-जपन-मात्र-प्रमुदितम् ॥२४
भवत्यङ्घ्रि - द्वन्द्वोद्वहन - गुरु - भारादवनतः ,
मुकुन्दोऽपि श्रान्तो भजति भुजगाधीश-शयनम् ।
यदुद्देश-क्लिष्टो भवति खलु यस्तस्य चरणम्,
किमाश्चर्यं ह्येतत् भजति गुरुतेयं समुचिता ॥२५
लये ब्रह्मादीनां त्वयि जल-तरीं केशव-मयीम्,
गृहीत्वा पाणिभ्यां विचरसि महा-सिन्धु-विवरे ।
जगद्-बीजोत्पत्ति-प्रभव-विवरां त्वां सुर-गणाः,
अतः प्रेतारूढा हरि - हृदय - वासेत्यपि जगुः ॥२६
त्वया पूर्वं रम्भासुर-सुत-शिवाऽधोक्ष जगतिः,
कृतो विष्णुर्बध्वा हत इति विचित्रा तव गतिः ।
यम - त्रासो धाता निगम-वदनः काम-वशगः,
अहं वश्या कस्येत्यपि तव मतं ज्ञातमधुना ॥२७
विधेयाधीनैव त्वमसि जनक - प्राङ्गण - मही,
प्रलये प्रवृत्ता स्मर - हर - धनुः स्वेन भुजतः ।
समुत्थायोत्कृष्टं भजन - फल - संशिन्मुपरता,
गृहे यस्य त्वं वै अवतरसि किं दुर्लभ-तरम् ॥२८
स्वकीयौदार्यत्वादभिलषित - मोक्षादि - फलदा,
त्वदङ्गस्यैवांशु रविरपि तमिस्रां प्रलयते ।

विभर्ता लोकानां हरिरपि ययाचे हि जनकम्,
अतस्त्वान्ते भक्तिर्बहु-फल-वती किन्न भवति ॥२९
अधो नागेशस्त्वं क्षिति-पतिरपि त्वं सुर-पतिः,
यमस्त्वं पाशी त्वं त्रिधिरसि हरिस्त्वं शिव इति ।
विभिन्नां त्वय्येवं विदधतु विधेयो गिरि-सुते,
प्रभाकारां वाणीं सकल-भुवन-त्राण-फलिताम् ॥३०
भवानी सर्वेशा निगम - जननी सिन्धु - तनया,
शची दुर्गा वाणी सकल - भुवनोत्कृष्ट - वपुषी ।
भवोत्पत्तौ बीजा सकल-सुर-रूपा च विशदा,
तनीयांसी माता इति पद-विधां नौमि भवतीम् ॥३१
त्वन्मौलि - वास - रवि - चन्द - कला प्रफुल्लम्,
पुष्पं सरोवर - समे च मुखे मदीये ।
भक्तिस्तवैव वरदे ! तव पाद - पद्मे,
आधादिदं भवतु भक्त - जनाश्रया सा ॥३२

॥ श्रीकालिदास-सुत दशमी-गर्भज-योगानन्द-कृतं श्रीबाला त्रिपुर-सुन्दरी महिम्न-स्तोत्रं ॥

कीत्रिपुरा बाला-पटलम्

॥ श्री पार्वती उवाच ॥

देव-देव ! महेशान ! यद्यहं प्रेयसी तव ।
पटलं श्रीबाला-देव्या, मुदा तन्मे प्रकाशय ॥

॥ श्री भैरव उवाच ॥

अथातः सम्प्रवक्ष्यामि, देवि ! गुह्य-तमोत्तमम् ।
येन विज्ञान - मात्रेण, साधको भैरवो भवेत् ॥
मन्त्रोद्धारं प्रवक्ष्यामि, यथा-वत् शृणु सादरम् ।
वाग्भवं प्रथमं प्रोक्तं, द्वितीयं काम-राजकम् ।
तृतीयं शक्ति-वीजं स्यात्, मन्त्रोद्धारः प्रकीर्तितः ॥

वाग्भवं = ऐं, काम-राज = क्लीं, शक्ति-वीज = सौः

न तिथिर्न च नक्षत्रं, नाङ्ग-न्यासं च मन्त्रिणाम् ।
न वार-दोषो न विघ्नो, न शौचोऽपि विधीयते ॥
यस्य तिष्ठति मन्त्रोऽयं, तस्य सिद्धिर्न दूरतः ।
ध्यानं तस्याः प्रवक्ष्यामि, यथावच्छृणु पार्वति ! ॥

॥ ध्यानम् ॥

मुक्ता-शेखर-कुण्डलाङ्गद - मणिग्रैवेय - हारोर्मिकाम्,
विद्योतिर्वलयादि-कङ्कण-वटी सूत्रां स्फुरन्नूपुरम् ।
माणिक्योदर-बन्ध-कञ्चुक-धरामिन्दोः कलां विभ्रतीम् ।
पाशं सांकुश-पुस्तकाक्ष-वलया दक्षोर्ध्व-बाह्वादितः ॥

पूर्णेन्दु-प्रतिम-प्रसन्न-वदनां नेत्र-त्रयोद्भासिताम्,
इन्दु - क्षीर-वलक्ष-गात्र-विलसन्माल्यानुलेपनाम्बराम् ।
मूलाधार-समुद्गता-भगवतीं हृत्-पङ्कजे चिन्तयेत् ।।

।। यन्त्रोद्धारः ।।

यन्त्रोद्धारं प्रवक्ष्यामि, शृणु देवि ! महा-फलम् ।
नव-योनि समालिख्य, पुनर्वृत्तं समालिखेत् ।।
तल्लग्नमष्ट-पत्रं तु, चतुरस्रं लिखेच्छिवे !
चतुर्द्वार-विशोभाढ्यं, सर्वानन्द-करं सदा ।।
विलिख्य पूजयेद् यन्त्रं, हेम-रूप्यादि-पट्टके ।
भूमौ चन्दन-पीठेषु, कुंकुमागरु-चन्दनैः ।।
सिन्दूर-रजसा वापि, कस्तूर-गुग्गुलादिभिः ।
सुवर्ण-रत्न-लेखिन्या, कल्पितं मृण्मयेऽथवा ।।
विलिख्य यन्त्रं देवेशि ! बालायाः सर्व-कामदम् ।

।। पुरश्चर्या-विधिः ।।

पुरश्चर्या विधातव्या, साधकेनास्य सिद्धये ।
वर्ण-लक्षं जपेन्मन्त्रं, तदर्द्धं वा महेश्वरि !
एक-लक्ष-विधं कुर्यान्नातो न्यूनं कदाचन ।।
जीव-हीनो यथा देही, सर्व-कर्मसु न क्षमः ।
पुरश्चरण-हीनो हि, न मन्त्रः फल-दायकः ।।
जपाद् दशांशतो होमः, तद्-दशांशेन तर्पणम् ।
मार्जनं तद्-दशांशेन, तद्-दशांशेन भोजनम् ।।

बिल्व श्मशानेऽरण्ये वा, शून्यागारे चतुष्पथे ।
अर्द्ध-रात्रेऽथ मध्याह्ने, पुरश्चर्याऽऽचरेत् सुधीः ।।
त्रिपुरा-बाला मन्त्रस्य, ऋषिः प्रोक्तस्तु दक्षिणा ।
गायत्री छन्दमाख्यातं, देवता हि बालेति च ।।
वाग्भवं बीजं शक्तिः, स्यान्मदनं कीलकं मतम् ।
विद्यार्थे विनियोगः स्यात्, एवं ऋष्यादि-कल्पना ।।
वाग्भवेनाचरेन्न्यासं, सर्व-मन्त्रं स्व - देहजम् ।
उपाङ्गं शृणु देवेशि ! रहस्यं सर्व-कामदम् ।।
यस्य श्रवण-मात्रेण, कोटि-पूजा-फलं लभेत् ।
गणेशो वटुकश्चैव, योगिनी - क्षेत्रपालकाः ।
एते द्वारे सदा पूज्याः, पूर्व-पश्चिमयोः क्रमात् ।।
इन्द्रादीन् पूजयेद् बाह्ये, तेषामस्त्राणि तद्-बहिः ।
पत्राग्रे पूजयित्वा च, भैरवानष्ट च क्रमात् ।।
असिताङ्गो रुरुश्चैव, चण्ड - क्रोधस्तथैव च ।
उन्मत्तश्च कपालश्च, संहारो भीषणाष्टमः ।।
केसरेषु च देवेशि ! अष्ट-शक्तीन् समर्चयेत् ।
ब्राह्मी माहेश्वरी चैव, कौमारी वैष्णवी तथा ।।
वाराही च तथेन्द्राणी, चामुण्डा सप्त मातरः ।
अष्टमी तु महा-लक्ष्मी, सम्पूज्या ह्यष्ट-योनिषु ।।
सुभगादीनष्ट-शक्तीः, सम्पूज्या सु-समाहितः ।
सुभगा-भग-रूपिण्यौ, भग-मालिन्यतः परम् ।।

नङ्गा ह्यनङ्ग-कुसुमा, मेखला मदनेति च ।
त्रिकोणेषु च सम्पूज्या, रति-प्रीति-मनोभवाः ।।
कामेश्वरं महेशानि ! विन्दौ सम्पूजयेत् सदा ।
गन्धाक्षतादि-पुष्पैश्च, धूप-दीपादि-तर्पणैः ।।
एतल्लयाङ्गमीशानि ! सर्व - देव - रहस्यकम् ।
गोपनीयं विशेषेण, सर्वस्वं मम पार्वति ! ।।
एतन्मन्त्रं गुरोर्लब्ध्वा, न द्रुतं न विलम्बितम् ।
अक्षराक्षरके देवि ! जपेन्मौक्तिक-पंक्ति-वत् ।।
तद्-गतश्चैक-चित्तश्च, शास्त्रोक्त-विधिना सुधीः ।
देव्यास्तु पुरतो ल , हुत्वा लक्ष-त्रयं जपेत् ।।
करवीर-प्रसूनं तु, क्षीराज्यं खण्ड-संयुतम् ।
कुण्ड-योन्याकृते धीमान्, जपान्ते जुहुयात् सुधीः ।।
अनुष्ठाने कृते धीमान्, पूर्ण-सेवा-कृतो भवेत् ।
ततो ददाति कामान् वै, देवी बाला महेश्वरी ।।
गुरुं सन्तोष्य विधिवल्लब्ध्वा मन्त्र-परं हि मम ।
अनेन विधिना युक्तो, मन्द-भाग्योऽपि सिद्धयति ।।
लक्षमेकं जपेद् यस्तु, साधको विजितेन्द्रियः ।
दर्शनात् क्षुभ्यते सर्व-योषितो मदनातुराः ।।
पतन्ति साधकस्याग्रे, निर्लज्जा भय-वर्जिताः ।
जप्तेन च द्वि-लक्षेण, ये यस्मिन् विषये स्थिताः ।।

आगच्छन्ति यथा तीर्थं, मुक्तं च कुल-विग्रहे ।
ददते तस्य सर्वस्वं, तस्यैव च वशे स्थितः ।।
त्रोणि लक्षैस्तथा जप्तैर्मण्डलीकं स-मण्डलम् ।
वशमायान्ति ते सर्वे, नात्र कार्या विचारणा ।।
षड्भिर्लक्षैर्महीपालः, स-भृत्य-बल-वाहनम् ।
लक्षैर्द्वादशकैर्जप्तैर्यक्ष—रक्षोरगेश्वरः ।।
वशमायान्ति ते सर्वे, आज्ञां कुर्वन्ति नित्यशः ।
त्रि-पञ्च-लक्षैर्जप्तैस्तु, साधकेन्द्रस्य धीमतः ।।
सिद्ध-विद्याधरश्चैव, गन्धर्वाप्सरसो गणाः ।
वशमायान्ति ते सर्वे, नात्र कार्या विचारणा ।।
हठात् श्रवण-विज्ञानं, सर्वज्ञत्वं प्रजायते ।
तस्याष्टादशभिर्लक्षैर्देहिनान्येन साधकः ।।
उत्तिष्ठे मेदिनीं त्यक्त्वा, दिव्य-देहस्तु जायते ।
भ्रमते स्वेच्छया लोके, छिद्रां पश्यति मेदिनेः ।।
अष्टाविंशतिभिर्लक्षैर्विद्याधर - पतिर्भवेत् ।
साधकस्तु भवेद् धीमान्, काम-रूपो महा-बलः ।।
त्रिंश-लक्षैस्तथा जप्तैर्ब्रह्म-विष्णु-समो भवेत् ।
रुद्रत्वं षष्टिभिर्लक्षैः, शरीरत्वमशीतिभिः ।।
कोटि-कारी महा-योगी, लीयते परमे पदे ।
साधकस्तु भवेद् योगी, त्रैलोक्येनाति-दुर्लभः ।।

त्रिपुरे त्रिपुरे त्वेकं, शिवं परम-कारकम् ।
अष्टमी द्वे चतुर्दश्यां, नवमी द्वे तथैव च ।।
रात्रौ सम्पूजयेद् यस्माद्, यथा-विभव-विस्तरैः ।
पलाश-काष्ठ-काशैश्च, तुलसी च विसर्जयेत् ।।
जपनात् पातके भूयाल्लग्नेशश्चापि श्रियं हरेत् ।
एवं सिद्धे मनुर्मन्त्री, साधयेदिष्टमात्मनः ।।
एवं कृते भवेद् वश्यो, रमया वसते गृही ।

।। तिलक-प्रयोगः ।।

कर्पूर-कपि-चाराणि, सप्त-भागानि कल्पयेत् ।
चतुर्भाग-जटामांसी, तावती रोचना मता ।।
कुंकुमा सप्त-भाग स्यात्, त्रि-भागं चन्दनं मतम् ।
अगरु नव-भागं स्यादिति भागा क्रमेण तु ।।
हिमादि-कन्यका-पिष्टमेतत् सर्वं सु-साधितम् ।
आदाय तिलकं भाले, कुर्याद् भूमि-पती नरान् ।।
वनिता मद-गर्वाढ्या, मदोन्मत्तान् मतङ्गजान् ।।
सिंहान् व्याघ्रान् महान् सर्पान्, भूत-वेताल-राक्षसान् ।।
दर्शनादेव नश्यन्ति, तिलकं धारयेन्नरः ।।
इत्येतत् पटलं गुह्यं, मन्त्र-राज-मयो ध्रुवम् ।
सर्व-तन्त्रेषु सर्वस्वं, गोपनीयं मुमुक्षुभिः ।।

।। श्रीविश्वसार-तन्त्रे त्रिपुरा-बाला-पटलं सम्पूर्णम् ।।

श्रीबाला सहस्रनाम-स्तवराजः

॥ शौनक उवाच ॥

कैलास-शिखरे रम्ये, नाना-पुष्पोप-शोभिते ।
कल्प - पादप - मध्यस्थे, गन्धर्व - गण - सेविते ॥१
मणि-मण्डप-मध्यस्थे, नाना-रत्नोप-शोभिते ।
तं कदाचित् सुखासीनं, भगवन्तं जगद्-गुरुम् ॥२
कपाल-खट्वाङ्ग-धरं, चन्द्रार्द्ध-कृत-शेखरम् ।
त्रिशूल-डमरु-धरं, महा-वृषभ-वाहनम् ॥३
जटा - जूट - धरं देवं, वासुकि कण्ठं - भूषणम् ।
त्रिभूति-भूषणं देवं, नील-कण्ठ त्रिलोचनम् ॥४
द्वीपि-चर्म-परोधानं, शुद्ध-स्फटिक-सन्निभम् ।
सहस्रादित्य-सङ्काशं, गिरिजार्द्धाङ्ग-भूषणम् ॥५
प्रणम्य शिरसा नाथं, कारणं विश्व-रूपिणम् ।
कृताञ्जलि-पुटो भूत्वा, प्राह तं शिखि-वाहनः ॥६

॥ कार्तिकेय उवाच ॥

देव-देव, महादेव ! सृष्टि-स्थित्यन्त-कारक !
त्वं गतिः सर्व-देवानां, त्वं गतिः सर्व-देहिनाम् ॥७
त्वं गतिः सर्व-देवानां, त्वं गतिर्विभो !
त्वमेव जगदाधारस्त्वमेव विश्व-कारणम् ॥८

त्वमेव पूज्यः सर्वेषां, त्वदन्यो नास्ति मे गतिः ।
किं गुह्यं परमं लोके, किमेकं सर्व-सिद्धिदम् ॥९
किमेकं परमं सृष्टिः, किं भौमैश्वर्य-मोक्षदम् ।
विना तीर्थेन तपसा, विना वेदैर्विना मखैः ॥१०
विना जाप्येन ध्यानेन, कथं सिद्धिमवाप्नुयात् ।
कस्मादुत्पद्यते सृष्टिः, कस्मिंश्च विलयो भवेत् ॥११
कस्मादुत्तीर्यते देव ! संसारार्णव-सङ्कटात् ।
तदहं श्रोतुमिच्छामि, कथयस्व महेश्वर ! ॥१२

॥ श्रीमहादेव उवाच ॥

साधु साधु त्वया पृष्टोऽस्म्यहं पार्वती-नन्दन !
अस्ति गुह्य-तमं पुत्र ! कथयिष्याम्यसंशयम् ॥१३
सत्त्वं रजस्तमश्चैव, ब्रह्म-विष्णु-शिवादयः ।
ये चान्ये बहवो भूताः, सर्वे प्रकृति-सम्भवाः ॥१४
सैव देवी परा-शक्तिर्महा-त्रिपुर-सुन्दरी ।
सैव संहरते विश्वं, जगदेतच्चराचरम् ॥१५
आधारं सर्व-भूतानां, सैव रोगार्ति-हारिणी ॥१६
इच्छा-शक्तिः क्रिया-रूपा, ब्रह्म-विष्णु-शिवात्मिका ।
त्रिधा शक्ति-स्वरूपेण, सृष्टि-स्थिति-विनाशिनी ॥१७
सृज्यते ब्रह्म-रूपेण, विष्णु-रूपेण रक्षति ।
हरते रुद्र-रूपेण, जगदेतच्चराचरम् ॥१८

यस्य योनौ जगत् सर्वमद्यापि वर्ततेऽखिलम् ।
यस्यां प्रलीयते चान्ते, यस्यां च जायते पुनः ।।१९
यां समाराध्य त्रैलोक्ये, सम्प्राप्तं पदमुत्तमम् ।
तस्याः नाम-सहस्रं ते, कथयामि शृणुष्व तत् ।।२०

।। विनियोगः ।।

ॐ अस्य श्रीबाला-त्रिपुरा-सहस्र-नाम-स्तोत्र-मन्त्रस्य भगवान् दक्षिणामूर्तिर्वाम-देवो ऋषिः, गायत्री छन्दः, प्रकट-गुप्त-गुप्त-तर-सम्प्रदाय-कुल-कौलोत्तीर्णा निगर्भ - रहस्याति-रहस्य-परापर-रहस्याचिन्त्य-वर्तिनी देवता, आकाश वीजं, माया शक्तिः, काम-राज कीलकं (जीवो बीजं, बुद्धिः शक्तिः, उदानो बीजं, सुषुम्ना-नाड्यादि-सरस्वती शक्तिः), ससस्त-धर्मार्थ-काम-मोक्षार्थे जपे विनियोगः ।

।। ध्यानम् ।।

आधारे तरुणार्क-बिम्ब-सदृशं हेम-प्रभं वाग्भवम्,
वीजं मन्मथमिन्द्र-गोप-सदृशं हृत्-पङ्कजे संस्थितम् ।
चक्रं भाल-मयं शशाङ्क-रुचिरं बीजं तु तार्तीयकम्,
ये ध्यायन्ति पद-त्रयं तव शिवे ! ते यान्ति सूक्ष्मां गतिम् ।।

।। सहस्र-नाम-स्तव-राजः ।।

कल्याणी कमला काली, कराली काक-रूपिणी ।
कामाक्षा कामदा काम्या, कामना काम-चारिणी ।।१

कौमारी करुणा-मूर्तिः, कलि-कल्मष-नाशिनी ।
कात्यायनी कलाधारा, कौमुदी कमल-प्रिया ॥२
कीर्तिदा बुद्धिदा मेधा, नीतिज्ञा नीति-वत्सला ।
माहेश्वरी महा-माया, महा-तेजा महेश्वरी ॥३
काल-रात्रिर्महा-रात्रिः, कालिन्दी कल्प-रूपिणी ।
महा-जिह्वा महा-लोला, महा-दंष्ट्रा महा-भुजा ॥४
महा - मोहान्धकारघ्नी, महा-मोक्ष-प्रदायिनी ।
महा-दारिद्र्य-राशिघ्नी, महा-शत्रु-विमर्दिनी ॥५
महा - शक्तिर्महा - ज्योतिर्महाऽसुर- विमर्दिनी ।
महा-काया महा-वीजा, महा-पातक-नाशिनी ॥६
महा-मखा मन्त्र-मयी, मणिपूर - निवासिनी ।
मानसी मानदा मान्या, मनश्चक्षुरगोचरा ॥७
गण-माता च गायत्री, गण-गन्धर्व-सेविता ।
गिरिजा गिरिशा साध्वी, गिरिसा गिरि-सम्भवा ॥८
चण्डेश्वरी चन्द्र-रूपा, प्रचण्डा चण्ड-मालिनी ।
चर्चिका चर्चिताकारा, चण्डिका चारु-रूपिणी ॥९
यज्ञेश्वरी यज्ञ - रूपा, जप - यज्ञ - परायणा ।
यज्ञ-माता यज्ञ-गोप्त्री, यज्ञेशी यज्ञ-सम्भवा ॥१०
यज्ञ-सिद्धिः क्रिया-सिद्धिर्यज्ञाङ्गी यज्ञ-रक्षगा ।
यज्ञ-प्रिया यज्ञ-रूपा, याज्ञी यज्ञ-कृपाऽऽलया ॥११

जालन्धरी जगन्माता, जात-वेदा जगत्-प्रिया ।
जितेन्द्रिया जित-क्रोधा, जननी जन्म-दायिनी ॥१२
गङ्गा गोदावरी गौरी, गौतमी च शत-हृदा ।
घुर्घुरा वेद-गर्भा च, रेविका कर - सम्भवा ॥१३
सिन्धुर्मन्दाकिनी क्षिप्रा, यमुना च सरस्वती ।
चन्द्र-भागा पिपाशा च, गण्डकी विन्ध्य-वासिनी ॥१४
नर्मदा कङ्क - कावेरी, वेत्रवत्या च कौशिकी ।
महोन - तनया चैव, अहल्या चण्यकावती ॥१५
अयोध्या मथुरा माया, काशि काञ्चि वन्तिका ।
द्वारावती च तीर्थेशी, महा-किल्विष-नाशिनी ॥१६
पद्मिनी पद्म-मध्यस्था, पद्म-किञ्जल्क-वासिनी ।
पद्म-वक्त्रा च पद्माक्षी, पद्मस्था पद्म-सम्भवा ॥१७
ह्रींकारी कुण्डली धात्री, हृत्-पद्मस्था सुलोचना ।
श्रींकारी भूषणा लक्ष्मीः, क्लींकारी क्लेश-नाशिनी ॥१८
हरि - प्रिया हरेर्मूर्तिर्हरि-नेत्र-कृतालया ।
हरि-वक्त्रोद्भवा शान्ता, हरि-वक्षः-स्थितालया ॥१९
वैष्णवी विष्णु-रूपा च, विष्णु-माता-स्वरूपिणी ।
विष्णु-माया विशालाक्षी, विशाल-नयनोज्ज्वला ॥२०
विश्वेश्वरी च विश्वात्मा, विश्वेशी विश्व-रूपिणी ।
विश्वेश्वरी शिवाधारा, शिव-नाथा शिव-प्रिया ॥२१

शिव-माता शिवाक्षी च, शिवदा शिव-रूपिणी ।
भवेश्वरी भवाराध्या, भवेशी भव - नायिका ॥२२
भव - माता भव-गम्या, भव-कण्टक-नाशिनी ।
भव - प्रिया भवानन्दा, भवानो भव - मोचिनी ॥२३
गीतिर्वरेण्या सावित्री, ब्रह्माणी ब्रह्म-रूपिणी ।
ब्रह्मेशी ब्रह्मदा ब्राह्मी, ब्रह्माणी ब्रह्म-वादिनी ॥२४
दुर्गस्था दुर्ग-रूपा च, दुर्गा दुर्गार्ति-नाशिनी ।
त्रयोदा ब्रह्मदा ब्राह्मी, ब्रह्माणी ब्रह्म-वादिनी ॥२५
त्वगस्था त्वग-रूपा च, त्वगा त्वगार्ति-हारिणी ।
स्वर्गमा निर्गमा दाता, दाया दोग्ध्री दुरापहा ॥२६
दुरघ्नी च दुराराध्या, दूर-दुष्कृत-नाशिनी ।
पञ्चस्था पञ्चमी पूर्णा, पूर्ण-पीठ-निवासिनी ॥२७
सत्त्वस्था सत्त्व-रूपा च, सत्त्वदा सत्त्व-सम्भवा ।
रजस्था च रजो - रूपा, रजो - गुण-समुद्भवा ॥२८
तामसी च तमो-रूपा, तामसी तमसः प्रिया ।
तमो-गुण-समुद्भूता, सात्त्विकी राजसी तमो ॥२९
कला काष्ठा निमेषा च, स्व-कृता तदनन्तरा ।
अर्ध-मासा च मासा च, सम्वत्सर-स्वरूपिणी ॥३०
युगस्था युग-रूपा च, कल्पस्था कल्प-रूपिणी ।
नाना-रत्न-विचित्राङ्गी, नानाऽऽभरण-मण्डिता ॥३१

विश्वात्मिका विश्व-माता, विश्व-पाशा विधायिनी ।
विश्वास-कारिणी विश्वा, विश्व-शक्तिर्विचक्षणा ॥३२
जपा-कुसुम-सङ्काशा, दाडिमी - कुसमोपमा ।
चतुरङ्गा चतुर्बाहुश्चतुरा चारु - हासिनी ॥३३
सर्वेशी सर्वदा सर्वा, सर्वज्ञा सर्व - दायिनी ।
सर्वेश्वरी सर्व - विद्या, शर्वाणी सर्व-मङ्गला ॥३४
नलिनी नन्दिनी नन्दा, आनन्दानन्द-वर्द्धिनी ।
व्यापिनी सर्व - भूतेषु, भव-भार-विनाशिनी ॥३५
कुलीना कुल - मध्यस्था, कुल-धर्मोपदेशिनी ।
सर्व - शृङ्गार - वेशाढ्या, पाशांकुश-करोद्यता ॥३६
सूर्य-कोटि-सहस्राभा, चन्द्र - कोटि-निभानना ।
गणेश-कोटि-लावण्या, विष्णु-कोटिचरि-मर्दिनी ॥३७
दावाग्नि-कोटि-ज्वलिनी, रुद्र-कोट्युग्र-रूपिणी ।
समुद्र-कोटि-गम्भीरा, वायु - कोटि - महा-बला ॥३८
आकाश-कोटि-विस्तारा, यम-कोटि-भयङ्करा ।
मेरु-कोटि-समुच्छाया, गुण - कोटि - समृद्धिदा ॥३९
निष्कलङ्का निराधारा, निर्गुणा गुण-वर्जिता ।
अशोका शोक - रहिता, ताप-त्रय-विवर्जिता ॥४०
विशिष्टा विश्व-जननी, विश्व-मोह-विधारिणी ।
चित्रा विचित्रा चित्राशी, हेतु-गर्भा कुशेश्वरी ॥४१

इच्छा-शक्तिः ज्ञान-शक्तिः, क्रिया-शक्ति शुचि-स्मिता ।
श्रुति-स्मृति-मयी सत्या, श्रुति-रूपा श्रुति-प्रिया ।।४२
श्रुति-प्रज्ञा महा-सत्या, पञ्च-तत्त्वोपरि-स्थिता ।
पार्वती हिमवन्पुत्री, पाशस्था पाश - रूपिणी ।।४३
जयन्ती भद्रकाली च, अहल्या कुल-नायिका ।
भूत-धात्री च भूतेशी, भूतस्था भूत-भाविनी ।।४४
महा-कुण्डलिनी शक्तिर्महा-विभव - वर्द्धिनी ।
हंसाक्षी हंस - रूपा च, हंसस्था हंस-रूपिणी ।।४५
सोम-सूर्याग्नि-मध्यस्था, मणिपूरक - वासिनी ।
षट्-पत्राम्भोज-मध्यस्था, मणिपूर - निवासिनी ।।४६
द्वादशार-सरोजस्था, सूर्य - मण्डल - वासिनी ।
अकलङ्का शशाङ्काभा, षोडशार - निवासिनी ।।४७
द्वि-पत्र-दल-मध्यस्था, ललाट - तल - वासिनी ।
डाकिनी शाकिनी चैव, लाकिनी काकिनी तथा ।।४८
राकिनी हाकिनी चैव, षट्-चक्र-क्रम-वासिनी ।
सृष्टि-स्थिति-विनाशा च, सृष्टि-स्थित्यंतकारिणी ।।४९
श्रीकण्ठा श्रीप्रिया कण्ठा, नादाख्या बिन्दु-मालिनी ।
चतुःषष्टि-कलाधारा, मेरु - दण्ड - समाश्रया ।।५०
महा-काली द्युतिर्मेधा, स्वधा तुष्टिर्महा-द्युतिः ।
हिंगुला मङ्गल - शिवा, सुषुम्णा-मध्य-गामिनी ।।५१

परा घोरा करालाक्षी, विजया जय-शालिनी ।
हृत्-पद्म-निलया देवी, भीमा भैरव - नादिनी ।।५२
आकाश-लिङ्ग-भूता च, भुवनोद्यान-वासिनी ।
महा-सूक्ष्माऽभया काली, भीम-रूपा महा-बला ।।५३
मेनका-गर्भ-सम्भूता, तप्त - काञ्चन - सन्निभा ।
अन्तःस्था कूट - बीजा च, त्रिकूटाचल-वासिनी ।।५४
वर्णाक्षा वर्ण - रहिता, पञ्चाशद्-वर्ण-भेदिनी ।
विद्याधरी लोक - धात्री, अप्सरा अप्सरः-प्रिया ।।५५
दक्षा दाक्षायणी दीक्षा, दक्ष-यज्ञ-विनाशिनी ।
यशस्विनी यशःपूर्णा, यशोदा - गर्भ - सम्भवा ।।५६
देवकी देव-माता च, राधिका कृष्ण-वल्लभा ।
अरुन्धती शचीन्द्राणी, गान्धारी गन्ध-मोदिनी ।।५७
ध्यानातीता ध्यान-गम्या, ध्याना ध्यानावधारिणी ।
लम्बोदरी च लम्बोष्ठा, जाम्बूवती जलोदरी ।।५८
महोदरी मुक्त-केशी, मुक्ति-कामार्थ-सिद्धिदा ।
तपस्विनी तपो - निष्ठा, चापर्णा पर्ण-पक्षिणी ।।५९
बाण-चाप-धरा वीरा, पाञ्चाली पञ्चम-प्रिया ।
गुह्या गम्भीरा गहना, गुह्य-तत्व-निरञ्जना ।।६०
अशरीरा शरीरस्था, संसारार्णव - तारिणी ।
अमृता निष्कला भद्रा, सकला कृष्ण-पिङ्गला ।।६१

चक्रेश्वरी चक्र - हस्ता, पाश-चक्र-विनाशिनी ।
पद्मराग - प्रतीकाशा, निर्मलाकाश - सन्निभा ॥६२
ऊर्ध्वस्था ऊर्ध्व-रूपा च, ऊर्ध्व-पद्म-निवासिनी ।
कार्य-कारण-कर्त्री च, पर्वाख्या रूप - संस्थिता ॥६३
रसज्ञा रस - मध्यस्था, गन्धज्ञा गन्ध-रूपिणी ।
पर-ब्रह्म - स्वरूपा च, पर-ब्रह्म - निवासिनी ॥६४
शब्द-ब्रह्म-स्वरूपा च, शब्दस्था शब्द - वर्जिता ।
सिद्धिर्वृद्धि-परा वृद्धिः, सकीर्तिर्दीप्ति-संस्थिता ॥६५
स्वगुह्या शाम्भवी शक्तिस्तत्वज्ञा तत्व-रूपिणी ।
सरस्वती भूत - माता, महा-भूताधिप-प्रिया ॥६६
श्रुति - प्रज्ञाद्यमे सिद्धिः, दक्ष-कन्याऽपराजिता ।
काम - सन्दीपिनी कामा, सदा-कामा कुतूहला ॥६७
भोगोपचार - कुशला, अमला ह्यमलानना ।
भक्तानुकम्पिनी मैत्री, शरणागत - वत्सला ॥६८
सहस्र-भुजा चिच्छक्तिः, सहस्राक्षा शताननना ।
सिद्ध-लक्ष्मीर्महा - लक्ष्मीर्वेद - लक्ष्मी सुलक्षणा ॥६९
यज्ञ - सारा तपस्सारा, धर्म - सारा जनेश्वरी ।
विश्वोदरी विश्व-सृष्टा, विश्वाख्या विश्वतोमुखी ॥७०
विश्वास्य-श्रवण-घ्राणा, विश्व-माला परात्मिका ।
तरुणादित्य - सङ्काशा, करणानेक - संकुला ॥७१

क्षोभिणी मोहिनी चैव, स्तम्भिनी जृम्भिणी तथा ।
रथिनी ध्वजिनी सेना, सर्व-मन्त्र-मयी त्रयी ।।७२
ज्ञान-मुद्रा महा - मुद्रा, जप - मुद्रा महोत्सवा ।
जटा-जूट-धरा मुक्ता, सूक्ष्म - शान्तिर्विभीषणा ।।७३
द्वीपि-चर्म - परीधाना, चीर-वल्कल-धारिणी ।
त्रिशूल - डमरु - धरा, नर - माला - विभूषिणी ।।७४
अत्युग्र - रूपिणी चोग्रा, कल्पान्त - दहनोपमा ।
त्रैलोक्य-साधिनी साध्या, सिद्ध-साधक-वत्सला ।।७५
सर्व - विद्या-मयी सारा, असुराम्बुधि-धारिणी ।
सुभगा सुमुखी सौम्या, सुशूरा सोम - भूषणा ।।७६
शुद्ध-स्फटिक-सङ्काशा, महा - वृषभ - वाहिनी ।
महिषी महिषारूढा, महिषासुर - घातिनी ।।७७
दमिनी दामिनी दान्ता, दया दोग्ध्री दुरापहा ।
अग्नि-जिह्वा महा-घोराऽघोरा घोर-तराननना ।।७८
नारायणी नारसिंही, नृसिंह - हृदय - स्थिता ।
योगेश्वरी योग-रूपा, योग - माला च योगिनी ।।७९
खेचरी भूचरी खेला, निर्वाण - पद - संश्रया ।
नागिनी नाग-कन्या च, सुरेशा नाग-नायिका ।।८०
विष-ज्वालावती दीप्ता, कला-शत-विभूषणा ।
भीम-वक्त्रा महा-वक्त्रा, वक्त्राणां कोटि-धारिणी ।।८१

महदात्मा च धर्मज्ञा, धर्मार्ति-सुख-दायिनी ।
कृष्ण - मूर्तिर्महा - मूर्तिर्घोर - मूर्तिर्वरानना ॥८२
सर्वेन्द्रिय - मनो - माता, सर्वेन्द्रिय-मनो-मयी ।
सर्व - संग्राम - जयदा, सर्व - प्रहरणोद्यता ॥८३
सर्व - पीडोपशमनी, सर्वारिष्ट - विनाशिनी ।
सर्वैश्वर्य - समुत्पत्तिः, सर्व - ग्रह - विनाशिनी ॥८४
भीतिघ्नी भक्ति-गम्या च, भक्तानामार्ति-नाशिनी ।
मातङ्गी मत्त-मातङ्गी, मातङ्ग-गण-मण्डिता ॥८५
अमृतोदधि - मध्यस्था, कटि - सूत्रैरलंकृता ।
अमृत-द्वीप - मध्यस्था, प्रबला वत्सलोज्ज्वला ॥८६
मणि-मण्डप-मध्यस्था, रत्न - सिंहासन-स्थिता ।
परमानन्द - मुदिता, ईषत् - प्रहसिताननां ॥८७
कुमुदा ललिता लोला, लाक्षा-लोहित-लोचना ।
दिग् - वासा देव - दूती च, देव-देवादि-देवता ॥८८
सिंहोपरि - समारूढ़ा, हिमाचल - निवासिनी ।
अट्टाट्ट - हासिनी घोरा, घोर-दैत्य-विनाशिनी ॥८९
अत्युग्रा रक्त-वसना, नाग - केयूर - मण्डिता ।
मुक्ता - हार - स्तनोपेता, तुङ्ग - पीन-पयोधरा ॥९०
रक्तोत्पल - दलाकारा, मदाघूर्णित - लोचना ।
गण्ड - मण्डित - ताटङ्का, गुञ्जा-हार-विभूषणा ॥९१

सङ्गीत-रङ्ग-रसना, वीणा - वाद्य - कुतूहला ।
समस्त-देव - मूर्तिश्च, ह्यसुर - क्षय - कारिणी ।।९२
खड्गिनी शूल-हस्ता च, चक्रिणी चाक्ष-मालिनी ।
खङ्गिनी चक्रिणी दान्ता, वज्रिणी वज्र-दण्डिनी ।।९३
आनन्दोदधि - मध्यस्था, कटि - सूत्रैरलंकृता ।
नानाभरण-दीप्ताङ्गी, नाना - मणि - विभूषणा ।।९४
जगदानन्द - सम्भूतिश्चिन्ता-मणि - गुणाकारा ।
त्रैलोक्य - नमिता पूज्या, चिन्मयानन्द-रूपिणी ।।९५
त्रैलोक्य-नन्दिनी देवी, दुःख-दुःस्वप्न-नाशिनी ।
घोराग्नि-दाह-शमनी, राज-दैवादि - शालिनी ।।९६
महाऽपराध-राशिघ्नी, महा - वैरि - भयापहा ।
रागादि - दोष-रहिता, जरा - मरण - वर्जिता ।।९७
चन्द्र-मण्डल - मध्यस्था, पीयूषार्णव - सम्भवा ।
सर्व - देवैः स्तुता देवी, सर्व-सिद्धि - नमस्कृता ।।९८
अचिन्त्य-शक्ति-रूपा च, मणि-मन्त्र-महौषधी ।
स्वस्तिः स्वस्ति-मनी बाला, मलयाचल-संस्थिता ।।९९
धात्री विधात्री संहारा, रतिज्ञा रति-दायिनी ।
रुद्राणी रुद्र - रूपा च, रौद्री रौद्रार्ति-हारिणी ।।१००
सर्वज्ञा चौर - धर्मज्ञा, रसज्ञा दीन - वत्सला ।
अनाहता त्रि - नयना, निर्भरा निर्वृतौ परा ।।१०१

परा घोर-करालाक्षी, स्व-माता प्रिय-दायिनी ।
मन्त्रात्मिका मन्त्र-गम्या, मन्त्र-माता समन्त्रिणी ।।१०२
शुद्धानन्दा महा-भद्रा, निर्द्वन्द्वा निर्गुणात्मिका ।
धरणी धारिणी पृथ्वी, धरा धात्री वसुन्धरा ।।१०३
मेरु-मन्दिर-मध्यस्था, शिवा शङ्कर - वल्लभा ।
श्रीगतिः श्रीमयी श्रेष्ठा श्री-करी श्री-विभाविनी ।।१०४
श्रीदा श्रीमा श्री-निवासा, श्रीमती श्रीमतां गतिः ।
उमा शारङ्गिणी कृष्णा, कुटिला कुटिलालका ।।१०५
त्रिलोचना त्रिलोकात्मा, पुण्यदा पुण्य-कीर्तिदा ।
अमृता सत्य-सङ्कल्पा, सत्याशा-ग्रन्थि-भेदिनी ।।१०६
परेशा परमा विद्या, परा - विद्या परात्परा ।
सुन्दराङ्गी सुवर्णाभा, सुरासुर - नमस्कृता ।।१०७
प्रजा प्रजावती धन्या, धन-धान्य-समृद्धिदा ।
ईशानी भुवनेशानी, भुवना भुवनेश्वरी ।। १०८
अनन्तानन्त - महिमा, जगत्-सारा जगद्-भवा ।
अचिन्त्य-शक्ति-महिमा, चिंत्याचिंत्य-स्वरूपिणी ।।१०९
ज्ञान-गम्या ज्ञान - मूर्तिर्ज्ञानदा ज्ञान-शालिनी ।
अमिता घोर - रूपा च, सुधा-धारा सुधावहा ।।११०
भास्करी भासुरी भाती, भास्वदुत्तान-शायिनी ।
अनसूया क्षमा लज्जा, दुर्लभा भुवनात्मिका ।।१११

विश्व-वन्द्या विश्व-वीजा, विश्व-धीर्विश्व-संस्थिता ।
शीलस्था शील-रूपा च, शीला शील-प्रदायिनी ॥११२
बोधिनी बोध-कुशला, रोधिनी वाधिनी तथा ।
विद्योतिनी विचित्रात्मा, विद्युत्-पटल-सन्निभा ॥११३
विश्व-योनिर्महा-योनिः, कर्म-योनिः प्रियम्वदा ।
रोगिणी रोग - शमनी, महा - रोग-भयावहा ॥११४
वरदा पुष्टिदा देवी, मानदा मानव - प्रिया ।
कृष्णाङ्ग-वाहिनी चैव, कृष्णा कृष्ण-महोदरी ॥११५
शाम्भवी शम्भु-रूपा च, शम्भु-रूपा शम्भु-सम्भवा ।
विश्वोदरी विश्व-माता, योग-मुद्रा च योगिनी ॥११६
वागीश्वरी योग-मुद्रा, योगिनी-कोटि-सेविता ।
कौलिकानन्द-कन्या च, शृङ्गाट-पीठ-वासिनी ॥११७
क्षेमङ्करी सर्व - रूपा, दिव्य-रूपा दिगम्बरा ।
धूम्र-वक्त्रा धूम्र-नेत्रा, धूम्र-केशी च धूसरा ॥११८
पिनाकि-रुद्र-वेताली, महा - वेताल - रूपिणी ।
तपिनी तापिनी दक्षा, विष्णु-विद्या त्वनाथिता ॥११९
अंकुरा जठरा तीव्रा, अग्नि-जिह्वा भयापहा ।
पशुघ्नी पशु - रूपा च, पशुदा पशु - वाहिनी ॥१२०
पिता माता च भ्राता च, पशु-पाश-विनाशिनी ।
चन्द्रमा चन्द्र-रेखा च, चन्द्र-कान्ति-विभूषणा ॥१२१

कुंकुमाङ्कित - सर्वाङ्गी, सुधीर्बुद्-बुद-लोचना ।
शुक्लाम्बर-धरा देवी, वीणा-पुस्तक-धारिणी ॥१२२
श्वेत-वस्त्र-धरा देवी, श्वेत-पद्मासन-स्थिता ।
रक्ताम्बरा च रक्ताङ्गी, रक्त-पद्म-विलोचना ॥१२३
निष्ठुरा क्रूर - हृदया, अक्रूरा मित - भाषिणी ।
आकाश-लिङ्ग-सम्भूता, भुवनोद्यान - वासिनी ॥१२४
महा-सूक्ष्मा च कङ्काली, भीम-रूपा महा-बला ।
अनुपम्य - गुणोपेता, सदा मधुर - भाषिणी ॥१२५
विरूपाक्षी सहस्राक्षी, शताक्षी बहु-लोचना ।
दुस्तरी तारिणी तारा, तरुणी तार-रूपिणी ॥१२६
सुधा - धारा च धर्मज्ञा, धर्म - योगोपदेशनी ।
भगेश्वरी भगाराध्या, भगिनी भगना-प्रिया ॥१२७
भग-विश्वा भग-विलग्ना, भग-योनिर्भग-प्रदा ।
भगेश्वरी भग - रूपा, भग - गुह्या भगावहा ॥१२८
भगोदरी भगानन्दा, भगाढ्या भग-मालिनी ।
सर्व-संक्षोभिणी-शक्तिः, सर्व-विद्राविणी तथा ॥१२९
मालिनी माधवी माध्वी, मद-रूपा मदोत्कटा ।
भेरुण्डा चण्डिका ज्योत्स्ना, विश्व-चक्षुस्तपोवहा ॥१३०
सुप्रसन्ना महा - दूती, यम - दूती भयङ्करी ।
उन्मादिनी महा - रूपा, दिव्य-रूपा सुरार्चिता ॥१३१

चैतन्य-रूपिणी नित्या, नित्य-क्लिन्ना मदोल्लसा।
मदिरानन्द - कैवल्या, मदिराक्षी मदालसा ॥१३२

सिद्धेश्वरी सिद्ध-विद्या, सिद्धाद्या सिद्ध-वन्दिता।
सिद्धार्चिता सिद्ध-माता, सिद्ध-सर्वार्थ-साधिका ॥१३३

मनोन्मयी गुणातीता, परं-ज्योतिः-स्वरूपिणी।
परेशी पारगा पारा, पार-सिद्धिः परा-गतिः ॥१३४

विमला मोहिनी - रूपा, मधु-पान-परायणा।
वेद-वेदाङ्ग - जननी, सर्व-शास्त्र - विशारदा ॥१३५

सर्व-वेद - मयी विद्या, सर्व-शास्त्र-मयी तथा।
सर्व-ज्ञान-मयी देवी, सर्व - धर्म - मयीश्वरी ॥१३६

सर्व-यज्ञ-मयी यज्वा, सर्व - मन्त्राधिकारिणी।
त्रैलोक्याकर्षिणी देवी, सर्वाद्यानन्द-रूपिणी ॥१३७

सर्व - सम्पत्त्यधिष्ठात्री, सर्व-विद्राविणी परा।
सर्व - संक्षोभिणी देवी, सर्व-मङ्गल-कारिणी ॥१३८

त्रैलोक्य-रञ्जनी देवी, सर्व-स्तम्भन-कारिणी।
त्रैलोक्य-जयिनी देवी, सर्वोन्माद-स्वरूपिणी ॥१३९

सर्व-सम्मोहिनी देवी, सर्व - वश्यङ्करी तथा।
सर्वार्थ - साधिनी देवी, सर्व-सम्पत्ति-दायिनी ॥१४०

सर्व-काम-प्रदा देवी, सर्व - मङ्गल - कारिणी ।
सर्व-सिद्धि-प्रदा देवी, सर्व - दुःख-विमोचिनी ।।१४१
सर्व-मृत्यु-प्रशमनी, सर्व - विघ्न - विनाशिनी ।
सर्वाङ्ग-सुन्दरी माता, सर्व-सौभाग्य-दायिनी ।।१४२
सर्वदा सर्व - शक्तिश्च, सर्वैश्वर्य-फल-प्रदा ।
सर्व-ज्ञान-मयी देवी, सर्व-व्याधि - विनाशिनी ।।१४३
सर्वाधारा सर्व - रूपा, सर्व - पाप - हरा तथा ।
सर्वानन्द-मयी देवी, सर्व - रक्षा - स्वरूपिणी ।।१४४
सर्व-लक्ष्मी - मयी विद्या, सर्वेप्सित - फल-प्रदा ।
सर्व - दुःख - प्रशमनी, परमानन्द - दायिनी ।।१४५
त्रिकोण-निलया त्रिष्टा, त्रि-मता त्रि-तनु-स्थिता ।
त्रै-त्रिद्या चैव त्रि-स्मारा, त्रैलोक्य-त्रिपुरेश्वरी ।।१४६
त्रिकोदरस्था त्रिविधा, त्रिपुरा त्रिपुरात्मिका ।
त्रि-धात्री त्रि-दशा त्र्यक्षा, त्रिघ्नी त्रिपुर-वाहिनी ।।१४७
त्रिपुर-श्रीः स्व-जननी, बाला-त्रिपुर-सुन्दरी ।
श्रीमत्-त्रिपुर - सुन्दर्या, मन्त्र-नाम-सहस्रकम् ।।१४८

।। फल-श्रुति ।।

गुह्याद् गुह्य-तरं पुत्र ! तव प्रीत्या प्रकीर्तितम् ।
गोपनीयं प्रयत्नेन, पठनीयं प्रयत्नतः ।।१
नातः पर-तरं पुण्यं, नातः पर - तरं शुभम् ।
नातः पर-तरं स्तोत्रं, नातः पर-तरा गतिः ।।२

स्तोत्रं सहस्रनामाख्यं, मम वक्त्राद् विनिस्सृतम् ।
यः पठेत् परमा भक्त्या, शृणुयाद् वा समाहितः ।।३
मोक्षार्थी लभते मोक्षं, सुखार्थी सुखमवाप्नुयात् ।
फलार्थी लभते कामान्, धनार्थी लभते धनम् ।।४
विद्यार्थी लभते विद्यां, यशोऽर्थी लभते यशः ।
कन्यार्थी लभते कन्यां, सुतार्थी लभते सुतम् ।।५
गुर्विणी लभते पुत्रं, कन्या विन्दति सत्-पतिम् ।
मूर्खोऽपि लभते शास्त्रं, चौरोऽपि लभते गतिम् ।।६
संक्रान्तावमावास्यामष्टम्यां भौम - वासरे ।
पठेद् वा पाठयेद् वापि, शृणुयाद् वा समाहितः ।।७
पौर्णमास्यां चतुर्दश्यां, नवम्यां च विशेषतः ।
स मुक्तः सर्व-पापेभ्यो, कामेश्वर-समो भवेत् ।।८
लक्ष्मीवान् सुतवांश्चैव, वल्लभः सर्व-योषिताम् ।
तस्या वश्यं भवेद् दास्यं, त्रैलोक्यं सचराचरम् ।।९
रुद्रं दृष्ट्वा यथा देवा, विष्णुं दृष्ट्वा च दानवाः ।
पन्नगा गरुडं दृष्ट्वा, सिंहं दृष्ट्वा यथा मृगाः ।।१०
मण्डूका भोगिनं दृष्ट्वा, मार्जारं मूषको यथा ।
कीट-वत् प्रपलायन्ते, तस्य वक्त्रावलोकनात् ।।११
अग्नि-चौर-भयं तस्य, कदाचिन्नैव सम्भवेत् ।
पातका विविधाः सन्ति, मेरु-मन्दर - सन्निभाः १२

भस्म-सात् तत्क्षणं कुर्यात्, तृणं वह्नि-युतं यथा ।
एकधा पठनादेव, सर्व - पाप - क्षयो भवेत् ।।१३
दशधा पठनादेव, वाञ्छा - सिद्धिः प्रजायते ।
नश्यन्ति सहसा रोगा, दशधाऽऽवर्तनेन च ।।१४
सहस्रं वा पठेद् यस्तु, खेचरो जायते नरः ।
सहस्र - दशकं यस्तु, पठेद् भक्ति - परायणः ।।१५
सा तस्य जगतां धात्री, प्रत्यक्षा भवति ध्रुवम् ।
लक्षं पूर्णं यदा पुत्र ! स्तव-राजं पठेत् सुधीः ।।१६
भव-पाश - विनिर्मुक्तो, मम तुल्यो न संशयः ।
सर्व-तीर्थेषु यत् पुण्यं, सर्व-यज्ञेषु यत् फलम् ।।१७
सर्व-देवेषु यत् पुण्यं, तत् फलं परि-कीर्तितम् ।
तत् फलं कोटि-गुणितं, सकृज्जप्त्वा लभेन्नरः ।।१८
श्रुत्वा महा - बलश्चाशु, पुत्रवान् सर्व-सम्पदः ।
देहान्ते परमं स्थानं, यत् सुरैरपि दुर्लभम् ।।१९
अद्वैत - योगिभिर्ज्ञेयं, मार्गगैरपि दुर्लभम् ।
स यास्यति न सन्देहः, स्तव-राज-प्रकीर्तनात् ।।२०
यः सदा पठते भक्तो, मुक्तिस्तस्य न संशयः ।।२१

।। श्री वामकेश्वर-तन्त्रे सनत्कुमार-सम्वादे श्रीजगदम्बा-बाला-त्रिपुर-सुन्दर्याः सहस्र-नाम-स्तव-राजः सम्पूर्णः ।।

श्रीबाला-मन्त्र-सिद्धि-स्तवं

ब्राह्मी-रूप-धरे देवि ! ब्रह्मात्मा ब्रह्म-पालिका ।
विद्या-मन्त्रादिकं सर्वं, सिद्धिं देहि परेश्वरि ! ॥१

महेश्वरी महा-माया, मानन्दा मोह-हारिणी ।
मन्त्र-सिद्धि - फलं देहि, महा - मन्त्रार्णवेश्वरी ॥२

गुह्येश्वरी गुणातीता, गुह्य-तत्वार्थ-दायिनी ।
गुण-त्रयात्मिका देवी, मन्त्र-सिद्धिं ददस्व माम् ॥३

नारायणी च नाकेशी, नृ-मुण्ड-मालिनी परा ।
नानानना कुलेशी, मन्त्र - सिद्धिं प्रदेहि मे ॥४

घृष्टि-चक्रा महा - रौद्री, घनोपस-विवर्णका ।
घोर-घोर-तरा घोरा, मन्त्र - सिद्धि - प्रदा भव ॥५

शक्राणी सर्व-दैत्यघ्नी, सहस्र-लोचनी शुभा ।
सर्वारिष्ट-विनिर्मुक्ता, सा देवी मन्त्र-सिद्धिदा ॥६

चामुण्डा-रूप-देवेशी, चलज्जिह्वा भयानका ।
चतुष्पीठेश्वरी देहि, मन्त्र - सिद्धिं सदा मम ॥७

लक्ष्मी-लावण्य-वर्णा च, रक्ता रक्त-महा-प्रिया ।
लम्ब-केशा रत्न-भूषा, मन्त्र - सिद्धिं सदा दद ॥८

बाला वीरार्चिता विद्या, विशाल-नयनानना ।
विभूति-दा विष्णु-माता, मन्त्र-सिद्धिं प्रयच्छ मे ॥९
मन्त्र-सिद्धि-स्तवं पुण्यं, महा-मोक्ष-फल-प्रदम् ।
महा-मोह-हरं साक्षात्, सत्य मन्त्रस्य सिद्धिदम् ॥१०
गोपनीयं महा-देवि ! गोप्याद् गोप्य-तरं प्रिये !
पठनीयं सदा भक्त्या, न देयं यस्य कस्यचित् ॥११

॥ श्री महा-काल-सहितायां श्रीबाला-देव्या
मन्त्र-सिद्धि-स्तवं सम्पूर्णम् ॥



श्री बकारादि बाला सहस्रनाम

॥ श्रीदेव्युवाच ॥

नमस्ते नाथ ! भगवन् ! विष-भक्षण शङ्कर !
ॐकार-पीठ-संवास ! मम रूपाणि सत्-प्रिय ! ॥१

प्रसिद्धानि महा-चण्ड ! कुरु माधव - वन्दित !
मद्-रूपिण्याश्च बालाया, मन्त्र-नाम-सहस्रकम् ॥२

॥ शिव उवाच ॥

अथातः सम्प्रवक्ष्यामि, त्रिपुरायाः शुभानि च ।
नाम - मन्त्र - सहस्राणि, वदामि परमेश्वरि ! ॥३
कटकानां च घोराणि, भक्तानां सुन्दराणि च ।
अनेक-मन्त्र - रूपाणि, गुप्ता गुप्त-तराणि च ॥४
शत्रूणां भय-कारणि, मित्राणां वृद्धिदानि च ।
मूल - मन्त्र - स्वरूपाणि, प्रीत्यर्थं तव सुन्दरि ! ॥५
श्रुताश्रुत-महद् - बीज - रूपाणि हरि - मातृके !
वक्ष्येऽहं नाम - मन्त्राणि, सागरोद्भव-लोचने ! ॥६

॥ विनियोगः ॥

ॐ अस्य श्रीबाला-त्रिपुर-सुन्दरी-सहस्रनाम-महा-मन्त्रस्य परब्रह्म ऋषिः, आदि-माया छन्दः, श्रीबाला-

त्रिपुरेश्वरी देवता, ऐंह्रींश्रींऐं बीजं, ऐंह्रींश्रींईं शक्तिः, ऐंह्रींश्रींलां कीलकं, श्रीबाला - त्रिपुर - सुन्दरी -प्रसाद-सिद्धयर्थे पाठे विनियोगः ।

॥ ऋष्यादि-न्यासः ॥

परब्रह्म-ऋषये नमः शिरसि । आदि-माया-छन्दसे नमः मुखे । श्रीबाला-त्रिपुरेश्वरी - देवतायै नमः हृदये । ऐंह्रींश्रींऐं बीजाय नमः दक्ष-स्तने । ऐंह्रींश्रींईं शक्तये नमः वाम-स्तने । ऐंह्रींश्रींलां कीलकाय नमः नाभौ । श्रीबाला-त्रिपुर-सुन्दरी-प्रसाद-सिद्धयर्थे पाठे विनियोगाय नमः पादयोः ।

षडङ्ग-न्यासः	कर-न्यासः	अङ्ग-न्यासः
ॐ ४ विराट्-पुरुषा-		
त्मिकायै श्रींह्रींऐंऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ-३ ईं श्रीपरब्रह्मेश्वर्यै		
श्रींह्रींइंऐंईं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ-३ लांश्रीं अंगुष्ठ-मात्र-पुरुषा-		
त्मिकायै श्रींह्रींऐंलां	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ-३ लांश्रीं पञ्चदशी-त्रिकूट-		
मायायै श्रींह्रींऐंलां	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ-३ इं प्रासाद-वीजाय		

षडङ्ग-न्यासः कर-न्यासः अङ्ग-न्यासः

श्रींह्रींऐंईं कनिष्ठाभ्यां वौषट् नेत्र-त्रयाय वौषट्

ॐ-४ श्रीं महा-शक्ति-ज्ञानात्मि-

कायै श्रींह्रींऐंऐं करतल-करपृष्ठाभ्यां फट् अस्त्राय फट्

[४=ऐं ह्रीं श्रीं ऐं, ३=ऐं ह्रीं श्रीं]

॥ ध्यानम् ॥

ऐंकार - सुपद्मक - मध्य - गता,
क्लींकार - विभूषित - नेत्र-पद्मा ।
सौकाराब्ज-विशालिनी च कूट—
त्रया तु मनु - वर्ण - विराजिता ॥

मन्त्रः—ॐ नमो भगवति ऐं ! क्लीं सौः श्रीमहा-मूल-बीजे ! मम भोग-मोक्षतां देहि ह्रीं नमस्ते ह्रीं स्वाहा ।

श्रीबाला बालिनी बाली, बाल-चन्द्र-सुफालिका ।
बालकी बाल - वृन्दा च, बाल-सूर्य-सम-प्रभा ॥१
बालिका बक-हारी च, बलाकाक्षी बलायुधा ।
बालेश्वरी बलासक्ता, बल - धारा बल-प्रभा ॥२
बल-वाहा बल-कारी, बकारार्थ - समन्विता ।
बन्धुकी बन्धु-वर्गा च, बन्धूक - कुसुमानना ॥३
बान्धवी बन्धरी बन्धी, बम्भराक्षी बलाकिनी ।
बन्धु-पाला बन्धु-वृद्धिर्बम्भरालि - सुमालिका ॥४

बन्धुकाङ्गी बाल-बीजा, बीजाबीज-समन्विता ।
बीजेश्वरी बीज-रूपा, बीज - मध्य-प्रवर्तिका ॥५
बीजाङ्गा बीज-मूला च, बीज-तत्त्व-समायुता ।
बीज-योगा बीज-कवचा, बीज-नेत्रा च बीज-भृत् ॥६
बीजाक्षर-समायुक्त - मुख - चन्द्र - विराजिता ।
बीज-नाभिर्बीज-जाला, बीज - कण्ठ - विमण्डिता ॥७
बीज-कन्दा बीज-मन्त्रा, बीजेशी बीज-नायिका ।
बीजात्मिका बीज - मूला, बीज-मूलेश्वरी बरी ॥८
बहिरन्तः - कलां बाही, बहिरन्तर्निवासिनी ।
बहिः-काला बहिर्भावा, बहिरन्तः-पदावली ॥९
बहिरन्तर्याग-युक्ता, बहिर्भूता बहिः-स्वरा ।
बहिर्वासा बहिर्मोहा, बहिर्बीजा बडेश्वरी ॥१०
बन्धिनी बाल-पंक्तिश्च, बन्धाबन्ध-विवर्जिता ।
ब्रह्मी ब्रह्मा बला ब्रह्मा, बद्धपास्य-प्रभञ्जनी ॥११
ब्रह्मेश्वरी ब्रह्म-देवी, बकारान्तः - प्रवेशिका ।
बल - हस्ता बलोत्कर्षा, बर्बरी बर्बरासना ॥१२
बर्बराक्षी बर्बरेशी, बर्बासुर - विखण्डिनी ।
बुद् - बुद्दी बुद्बुदाभा च, बुद्-बुदाक्षर-संयुता ॥१३
बृहन्नाम्नी बृहद् - रोम - राजिता बृहदीश्वरी ।
बालानल - समायुक्ता, बाल - भूत - हरा बृही ॥१४

बृहन्निष्ठा बृहत् - कर्षा, बृहन्मार्गा बुधेश्वरी ।
बुध - वन्द्या बुधासक्ता, बुध - शक्रादि-वन्दिता ॥१५
बुद्धिदा बुद्धिनी बुद्धिर्बुद्धि - रूपा बृहन्निधिः ।
बुद्ध्यात्मिका बुद्धि-वासा, बुद्धि-चार-समन्विता ॥१६
बुद्धि-बीजा बृहन्निद्रा, बुद्धि-कृद् बुद्धि-वासिनी ।
बुद्धि-निष्ठा बुद्धि-सेव्या, बुद्धि-माता च बुद्धकी ॥१७
बुद्धि-मध्य-भवासक्ता, बुद्धि-रूपा च बोधिनी ।
बुद्ध-पुष्प-समायुक्त - वीर - माला - विभूषिता ॥१८
बुद्धीश्वरी बुद्धि - सिद्धिर्बेल - दन्ता बहिर्निशा ।
बलाक-दृष्टि - संराजा, बल - पक्षि-महाऽऽसना ॥१९
बलेश्वर-महा-साल्वा, बलभी नारसिंहिका ।
बल-शरभा बला - माला, बल-कारा बलोदरी ॥२०
बाहु-विंशत्-समायुक्ता, बाहु - सर्ग - समन्विता ।
बाहु - भूषा बाहु - कीला, बहिरन्तर्यशः - पदा ॥२१
बहिः-पद्मा बहिः - सूर्या, बहिरन्तः-क्रिया-युता ।
बकाराक्षर - संयुक्ता, बाल - विष्णु-शिवेश्वरी ॥२२
बगलास्या बलाकारा, बगला-शक्ति-सेविता ।
बङ्गा बङ्गालिकी बङ्गी, बङ्गाली बङ्ग-रूपिणी ॥२३
बङ्ग-बीजा बङ्ग-जिह्वा, बङ्ग-कीलक-संयुता ।
बङ्ग-मन्त्रा बङ्ग-यन्त्रा, बङ्ग-तन्त्रा च बङ्गिनी ॥२४

बङ्ग-भङ्ग-समाहारी, बिन्दु - रूपा बिलेशिका ।
बिल्व-प्रभा बिल्व-पत्रा, बिन्दु-मध्य-सुचारिणी ।।२५
बिल्व-मुक्ताम्बिकेशा च, बिल्व-पर्ण-सुमालिका ।
बाल-हन्त्री बला - नारी, बाल-वृद्ध-प्रपालिनी ।।२६
बिम्ब-दन्ता बिम्ब-रूपा, बिम्ब-मध्य-विहारिणी ।
बिम्बोष्ठी बिम्बहर्त्री च, बिम्बनेत्रा च बिम्बभृत् ।।२७
बिम्बाबिम्ब-विसर्जा च, बिम्बेश्वर-विमोहिनी ।
बिम्बासुर-हरा बिभ्री, बिभ्राणी बिभ्र-मालिका ।।२८
बिभ्राणि-तनगा बिसी, बिभ्रच्चक्रा बिलायुधा ।
बिलेश्वर - समावन्द्या, बिल्व-मूल-निवासिनी ।।२९
बिल्व-मध्या बिल्वकाग्रा, बृन्दावन-विहारिणी ।
बृन्देशी बृन्द-मध्यस्था, बृन्दाबृन्द - समन्विता ।।३०
बृन्द-बीजा बृन्द-मूला, बृन्दी-कृत-सुका बणी ।
बृन्देश्वरी बृन्द - माला, बृन्दावन - वनेश्वरी ।।३१
बृन्दावनस्था-देवेशी, बृन्दाबृन्द - करेश्वरी ।
बृन्दावना बृन्द-केशी, बृन्दि-तालक - संयुता ।।३२
बृन्दासुर-वधोत्कर्षा, बृन्दावन - शिखान्तरा ।
बृन्द-वृक्ष - समायुक्त - हस्त - पद्म - विराजिता ।।३३
बसासक्ता बिसाचारा, बिस-मन्त्रा बिसेश्वरी ।
स-हस्ता - बिसाकारा, बिस-सद्भाव-कारिणी ।।३४

बिस-मूला बिसोत्कर्षा, बिसाबिस - गणेश्वरी ।
बिस-तन्तु-तनीयाभा, बिस - पल्लव - पादुका ॥३५
बृहत्-कुम्भ-स्तन-द्वन्द्वा, बृहती बृहि - धारिणी ।
बृहत्कारी बृहच्छत्रा, बृहद्वीरा बृहीश्वरी ॥३६
बुध-राजेश्वरी बृङ्का, बृङ्कावृङ्क - गणेश्वरी ।
बुधावतारिणी बृञ्जी, बृङ्क - सर्प - विमालिनी ॥३७
ब्रह्म-निष्ठा ब्रह्म-तत्त्वा, ब्रह्माब्रह्म-विचारिणी ।
ब्रह्म-शब्दा ब्रह्म - कीर्तिर्ब्रह्माणी ब्रह्म-शक्तिनी ॥३८
ब्रह्मेश्वरी ब्रह्म - माता, ब्रह्म-बीजा बहूदया ।
ब्रह्म-पादा ब्रह्म - वन्द्या, ब्रह्म-तत्त्वार्थ-वादिनी ॥३९
ब्रह्मेशी ब्रह्मरी ब्राह्मी, ब्रह्माणी ब्रह्म-जीविका ।
ब्रह्म - प्राण - महा - शक्तिर्ब्रह्मण्येश्वर-वन्दिता ॥४०
ब्रह्म-पुत्री ब्रह्म-भार्या, ब्रह्म-माया च ब्रह्म-भृत् ।
ब्रह्म-वक्त्र-निवासा च, ब्रह्म-शब्द-मयात्मिका ॥४१
ब्रह्म - लोक - समावासा, ब्रह्मादि-शिव-सेविता ।
ब्रह्म-कमण्डलु - भूता, ब्रह्म-विद्या-समायुता ॥४२
ब्रह्म-विद्यात्मिका ब्राङ्गी, ब्रह्म-बोध-प्रबोधिनी ।
बोधी बोधेश्वरी बोधा, बोधिनी बोध-रूपिणी ॥४३
बोधान्तस्था बोध-नित्या, बोध-शक्ता च बोधभृत् ।
बोध-नेत्र-सहस्रा च, बोधेशी बोध - हेलिका ॥४४

बोध-बीजा बोध-काला, बोधाबोध-विवर्जिता ।
बोध - मुक्तेश्वरासक्ता, बोधघ्ना बोध-दायिनी ।।४५
बोध-माता बोध-पूर्णा, बोध-शक्ति-समन्विता ।
बोधवती बोध - वचा, बोधी - कृत-सुशब्दिनी ।।४६
बोधितेन्द्र-समावेशा, बोधाबोध - परायिणी ।
बोध-राक्षस - संहर्त्री, बोध - बीज - निपातिनी ।।४७
ब्रह्म - रक्षः - समाकर्षा, ब्रह्म-राक्षस-मोहिनी ।
ब्रह्म - रक्षः - समावेशा, ब्रह्म-राक्षस-किङ्करा ।।४८
ब्रह्म - रक्षो - महोच्चाटा, ब्रह्म-राक्षस-मारिणी ।
ब्रह्म - रक्षो - महा-स्तम्भी, ब्रह्म-राक्षस-रक्तपा ।।४९
ब्रह्मेशी ब्राह्मणासक्ता, ब्राह्मणस्था च बाण-भृत् ।
ब्रह्मेश्वर-समासेव्या, ब्राह्मण - प्रिय - मानसी ।।५०
ब्रह्म - गन्धा ब्रह्म - धूपा, ब्रह्म-पूजा बलङ्करी ।
ब्रह्म - विष्णु - महादेव - परब्रह्म - मयात्मिका ।।५१
ब्रह्म - किन्नर - गन्धर्व - यक्ष - भूत - ग्रहेश्वरी ।
बाणाधारा बाण-मध्या, बाण-पृष्ठ-विराजिता ।।५२
बाणेश्वरी बाण-वासा, बाण-लिङ्ग-धराऽम्बिका ।
बाण-लिङ्गेश्वरी बाणी, बाणिनी बाण-रूपिणी ।।५३
बाण-हस्ता बाण-चक्रा, बाणीरासन-मण्डिता ।
बाणिरी बाण - बीजा च, बाण-सिंह-हरार्पिता ।।५४

बाणीरेशी बाण-तन्त्रा, बाण-मन्त्र-विमोहिनी ।
बाण-मन्त्र-सुनाम्नी तु, बाणासुर - विमर्दिनी ।।५५
बाणासुर-हरेशानी, बाणा - बाण - निवासिनी ।
बाणाकारा बाण-वदनी, बाणानन्द - प्रदायिनी ।।५६
बाण - मूर्ति - समुत्कर्षा बाण-शम्भु-सुपृष्ठका ।
बदरी बद - रूपा च, बदर्यर्थ - समायुता ।।५७
बधिरी बद - वासा च, बादरायण - पूजिता ।
बाद-नारायणो बन्दी, बण्डावलि - विराजिता ।।५८
बण्डेश्वरी बण्ड - बीजा, बद्रि-नारायणार्चिता ।
बदरेश्वर - सम्वन्द्या, बदरी - वन - वासिनी ।।५९
बदरी-फल-कुच्चाङ्गा, बदरी - फल - सम्प्रिया ।
बृन्दावन - समारूढा, बड-काष्ठ - मया च तु ।।६०
बण्डासुर - वधोद्युक्ता, बण्ड - हाल - हलायुधा ।
बिम्बाक्षी बिन्दिनी बिन्दो, बिन्द्वबिन्दु-कलात्मिका ।।६१
बहु-रूपा बहूत्साहा, बहु - मन्त्रा बहु - प्रिया ।
वहु-वादा वहुच्छाया, वहु - वार्ता तथा वहूः ।।६२
बहु-वीजा बलेशानी, बहु - कीर्तिर्बहु-धरा ।
बहु-योगा बिन्दु-वर्गा, बिन्दा बिन्दु-निवासिनी ।।६३
बिन्दु-शत्रु-ललापाना, बैन्दवासन - रञ्जिता ।
बिन्दु-मण्डल-मध्यस्था, बिन्दुसी बिन्दु-मालिनो ।।६४

बिन्दु-युक्त-समावर्णा, बिन्दु - सर्ग - विमातृका ।
बीज-कूट-त्रया बीजी, बीजेश्वर - सुवाहिनी ॥६५

बीजासुर-मांस-खण्डा, बीजानन्द-स्वरूपिणी ।
बीज-नाथा बीज-क्रूरा, बीजङ्कुर-विवन्दिता ॥६६

बीज-पूरा बीज-पूर्णा, बुण्ड-दण्ड-विधारिणी ।
बूर्णा बूर्ण - स्वरूपा च, बूर्ण-ब्रह्म-महा-ध्वजा ॥६७

बृहन्नाथा बृहद्-विश्वा, बृहदग्नि - विनाशिनो ।
बृहद्-भूमि-धरा ब्रूणी, ब्रूणीताक्षर-मालिका ॥६८

ब्रूणिका ब्रूसणारा तु, ब्रष-हस्ता कुलेश्वरी ।
बाणालङ्कार - देहा च, बाणानन्दन - वाहिनी ॥६९

बलि-प्रिया बलादेशा, बलि-हस्त-द्वयान्विता ।
बलि-काला बल्हि - रात्रिर्बलि-भक्षण-मण्डिता ॥७०

बलि-धर्मा ब्रहिः-सोमा, बलि-मित्रा बलानना ।
बलि-विश्व - मनोराजा, बल्यन्तर - निवासिनी ॥७१

बलि-नियमा बहिर्मुण्डा, बहु-सर्प-विष-प्रिया ।
बहिर्मुण्डा बर्हिः क्षुरा, बाला-मणि-विपूजिता ॥७२

बद्ध-मुक्ता-फलाङ्गा च, बिम्ब-विद्रुम-मण्डिता ।
बलाक-गुरु-सन्मार्गा, बल - वद् - गुरु-वन्दिता ॥७३

बलावती बला-शक्तिर्वक-जृम्भ-विमर्दिनी ।
बन्ध-चक्रेश्वरी बाणो, बाणाबाण-निवासिनी ।।७४

बाण - मध्योदका बाहा, बल-वद्-गरुडासना ।
बल-वद्-वृषभारूढा, बल-वद्-राम-हंसिका ।।७५

बकिनी बाकिनी ब्रान्दा, बाकिनी-गण-सेविता ।
बिकिनी ब्रङ्किनी ब्रन्धो, बङ्गालाङ्ग-समन्विता ।। ७६

ब्लुकिनी ब्लुङ्किनी ब्लुङ्की, बुकिनी बृन्दह-वन्दिता ।
ब्लुङ्किनी बैकिनी बङ्गी, बङ्गालाक्षर-युक्तिनी ।।७७

ब्लोङ्किनी ब्लौङ्किनो ब्लुञ्ची, बौकिनी-जाल-सन्नुता ।
ब्रङ्किनी बब्रुनी बाक्षी, बक्षासुर - विभेदिनी ।।७८

ब्लुङ्कार-मूर्ति-संराजा, ब्लुं-ब्लुन्धार-सुमण्डिता ।
बक-योग-समाख्याता, बादि-लान्त-समन्विता ।।७९

बेती बेतालिका बेनी, बेताली बेन-रूपिका ।
बेतालिनी बेत - वासा, बेताबेत - समायुता ।।८०

बेतालाक्षा बेत - नासा, बेताल - प्रमुखेश्वरी ।
बेताल-वीजा बेताला, बेधाबेध-विनाशिनी ।।८१

बुद्धि-तारा ब्लुङ्कारा, ब्लुङ्काब्लुङ्क-विचारिणी ।
ब्लुङ्क-केशी ब्लेङ्क-वासा, ब्लंहिङ्कार-समन्विता ।।८२

बं-हुङ्कार-मुखी बाची, ब्लोङ्कारासक्त-मानसा ।
बड - वीजेश्वरी बाया, बडवानल - लोचनी ॥८३

बिन्दु-बाली बंग्य-कूर्मा, बंग्याबंग्य-सुमच्छिका ।
बंग्य - पीठ - समावासा, बंग्य-वर्णोऽनुकूलिनी ॥८४

बङ्गेश्वरी बङ्ग-नित्या, बंग्य-सिंह-सुवाहना ।
बींग्य - कीलक - संयुक्त-ऋषि-छन्दोऽनुकूलिका ॥८५

बेलकी वेल - नेत्रा च, बिड - लक्षण - संयुता ।
बिढ्य-बीजा बिढ्य-नाडो, विढ्याबिढ्यप्रवर्तिका ॥८६

बडाभय-धरा बिली, बिल्व-केशानु-वन्दिता ।
बिभ्रणीत-सम्पवर्गा, बिभ्राभ्राकाश-वाहिनी ॥८७

बिभ्रश्र-बकुपालाख्या, बन्दी बादि-सुवर्णिनी ।
बीज-लक्ष-समाख्याता, बीज-युक्त-शिरो-युता ॥८८

बीज-मन्त्र-समालाख्या, बीजाबीजात्मिका बजी ।
बर्हिर्बर्हिणी बर्हा च, बर्हाक्षी बर्हि-मण्डला ॥ ८९

बर्हि-धारा बर्हि-वज्रा, बर्हि-भूत-विनाशिनी ।
बाला-बाल-प्रबोधा च, बर्हि-चूडामणि-स्तुता ॥९०

बाजकी बञ्ज-रूपा च, बञ्ज-दम्भ-प्रहारिणी ।
बिन्तकासी बीज-कीला, बीलाबील-निवासिनी ॥९१

बिधदा ब्राङ्किणी ब्रङ्गी, ब्रङ्गाङ्गासक्त-मङ्गला ।
बिव्युकण्टा बिसु-हारा, बिण्डीरादि-समन्विता ।।९२

बलि-भिघ्ना बिडी-क्रूरा, बैड-तन्त्र-समन्विता ।
बन्धुरी बन्ध-बान्धाली, बन्ध-राज-बलेश्वरी ।।९३

बलभद्री बलेच्छा तु, बलभद्र - प्रयोगिनी ।
बलभद्र - सुमात्रा च, बलभद्र - सहोदरी ।।९४

बलभद्र-प्रिया बाड्धिर्बाध्याबाध्य-विनाशिनी ।
बलभद्रेश्वरी बर्ली, बलराकार - मण्डिता ।।९५

बलोत्कृष्टा बलोद्भोजा, बल-शत्रु-निकृन्तिनी ।
बलरामेश्वरी बाल्या, बाल्याबाल्य-विनोदिनी ।।९६

बलराम-प्रिया ब्रङ्की, ब्रङ्किणी-गण-मध्यगा ।
बल-राज-ब्रहिष्कारी, बहिष्कारेश्वरार्चिता ।।९७

बहिष्कारी - कृता - देवा, बहिष्कारासनेश्वरी ।
बहिष्कृत - महा-भूता, बहिरन्तः - प्रदीपिका ।।९८

बहु-सम्पत्-समायुक्त-पाणि-चक्र - विराजिता ।
ब्लाङ्कारी ब्ल्याङ्कारी च, बांबींब्ल्यंब्ल्य-बीज-रूपिणी ।।९९

ब्राह-कारी ब्रुन्धराकारी, बखगाक - सुवर्णिका ।
ब्लङ्किनी ब्लाङ्किनी ब्लुङ्की, ब्लुङ्क-श्रीगण-सेविता ।१००

ब्लीकिनी ब्लीङ्किनी ब्लींग्री, ब्लुङ्कृही-गण-वन्दिता ।
ब्रङ्किटी ब्राङ्किटी ब्रण्टी, ब्रङ्किणी-नुत-पादिनी ॥१०१

ब्रिङ्किटी ब्रीङ्किटी ब्रुण्डी, ब्रुंकुटी ब्रुकुटी तथा ।
ब्रेङ्किटी ब्रैंकिनी बंक्लीं-धारिणी ब्रुग-मालिनो ॥१०२

ब्रौङ्किटी ब्रौङ्किनी बंमै-धारिणी बिल्व-लोचनी ।
ब्रङ्किनी ब्राहिकासक्ता, ब्रःकीटी बुकु-कुण्डली ॥१०३

बुत्-कुण्डल - करासक्त-मनोबुद्धि - विराजिता ।
बीङ्कल-ह्रीं-धारिणो बीनी बङ्कलह्रीं-विधारिणी ॥१०४

बाक-पंक्ति-समावाहा, श्रींह्रींऐंकं - विधारिणी ।
बहु-सम्पत्-समाध्याता, ब्रह्म - कल्पामृतेश्वरी ॥१०५

ब्रह्म-शास्त्र-समामोहा, ब्रह्म - कर्मानुमण्डिता ।
बार्वासन-समाख्याता, बुल-जाल - प्रमोहिका ॥१०६

बहु-मासा बाहवी बान्धी ब्रह्म-पुत्रादि-पूजिता ।
बालाकिनी बाक-सह-मूल - बीजाक्षरी तथा ॥१०७

बेदी-कृत - महा-द्वीपा, बेंबैंबोंभूः-स्वरूपिणी ।
बाङ्करी बङ्क-अङ्करा, ब्लोंब्लौंब्लंब्लः-स्वरूपिणी ॥१०८

बिल-ताल-प्रभावा-मां ब्लांद्री-स्वरूपिणी तथा ।
बुभू-रक्षा-करा बुर्बिर्बुक्क-कङ्क - हनु - क्रिया ॥१०९

बुररेशी बुरकाक्षी, बुभुसा-बुल्क - धारिणी ।
बलमानु-प्रवर्णा च, बादि-डान्त - सुबीजका ॥११०

ब्लुहु-हाहा-हुहु-धारा, ब्लीहीहा - हेह-बीजका ।
ब्लेंहेहो-हहकी-बीजा, ब्लेंल्हां-माकाग-धारिणी ॥१११

बद्रकी-गण - संराज्ञी, बद्र - रूपा बकायनी ।
बोजाघोरा बीज-कासा, बीज-गौण-गणेश्वरी ॥ ११२

बहु - वलो - चतुर्युक्ता, बुम्बुरी बुम्बुरेश्वरी ।
बुम्बराखा-महा-नाम्नी, बुररीकानु-कूलिका ॥११३

बृहस्पति-समा-वन्द्या, बुध्यगन्धानु-कोलकी ।
बुध्यकी बुध्यकेशा च, बुद्धी-कृत-सुवेणिका ॥११४

बलायमान-कोपा च, बलि-कन्या-सुतेश्वरी ।
बलिकारा ब्रध्नावाहा, व्यंग्मंहंहुं-विधारिणी ॥११५

बकनद्री - महा-रूपा, बींकलद्रीङ्क - रूपिणी ।
बोकलद्रौं-निराभासा, बङ्कलद्रीं - स्वरूपिणी ॥११६

ब्लुङ्कलद्री-कृताकारा, बुंसौः-ॐकार-रूपिणी ।
बिकलद्रां-कृताकारा, बिन्द्रा बीं-बीज-वेक्षिका ॥११७

ऐं क्लीं सौः-महाबीजा, सौःक्लीं ऐं-वेश्म-धारिणी ।
बीण्डवालो विण्डोत्कृष्टा-सुबींड-द्रव - संयुता ॥११८

बीढ्य-तालु-सुमूला बिम्बीढी बारी बिकालिका ।
बिम्भक्ष-कोटि-चन्द्रार्का, बिम्भाबिम्भ-निवासिनी ।।११९

बिलह-कला बिभ्रि-काला बिम्भ-शेखर-सन्नुता ।
ब्रह्मिकसोर्ड-बिल-कोटी, बद्रि-पद्मासन-स्थिता ।।१२०

ब्रल-धुरा ब्रल-छुभ्रा, बृण-कृद् बाकषी-वषी ।
ब्रणीक्षर-समायुक्त-माला - मन्त्र - विराजिता ।।१२१

ब्रणत्-पूर्णा ब्रण-ग्राह्या, ब्रण्याब्रण्य - विवर्जिता ।
ब्रणद्-बुर्ण्य-ब्रणित्-सर्पा, ब्रण्याणी ब्रण्य-वासिनी ।।१२२

बुर्कघ्ना बुकिलासक्ता, बुक - किङ्कर-वन्दिता ।
बुगम्मुगित-मानाक्षी, बुटाका - नट-वस्त्रिणी ।।१२३

ब्रणि-श्रोत्र-महा-शब्दा, ब्रणत्-कीलक-भुम्भुजा ।
बुकि-भुकत-मानेशी, बुर्भ - मण्डल - बिण्डरा ।।१२४

बिकटा बिकटाघोरा, बीडकोत्कर्ष - दर्विका ।
बिडारक्त-प्रभावा च, बीडम - द्रुम - मण्डला ।।१२५

बिध्याकारा बधी बाध्नी, बन्धगाद्य-सुबीजकी ।
बिनक-बाङ्क-स्वरूपा च, बिड-गिज्या बिडायनी ।।१२६

बिम्भूताभ-समायुक्त - मन्त्र - प्रेत-विनाशिनी ।
बिङ्गी-गण्डा-रवा बीं-ब्रीं-बिङ्गेद्या बिङ्गहेलिका ।।१२७

बिग्य-देव-वरा ब्रीहि-धारिणी बिस-रूढ़िका ।
बिल्क-तत्त्वार्थ-संयुक्ता, बिल्केशी बिल्क-रूपिणी ।।१२८

बिल्क-बीज-प्रभावृत्या, बिल्काबिल्क-विहारिणी ।
बिल्क-गुह्या-याचमाना, बिहणी बाणही बिहो ।।१२९

बिहणार्थ-प्रपादी च, बिरणी-गण-वन्दिता ।
बिहणासक्त-जीवा च, बिन्द-पञ्चेश्वरीङ्गणी ।।१३०

बिन्दाबिन्द-सुमालास्या, बिन्द-राक्षस-भञ्जनी ।
बिट-पुत्रादि-निर्ध्वंसा, बिट्टिणी-वृन्द-वन्दिता ।।१३१

बिट्-क्रसद्वापमानाख्या, बिट्-क्रुधारा च बैतकी ।
बिट्-पटरी बिट-क्रूरी, बिद्राबिद्र-विनोदिनी ।।१३२

बिद्य-कान्त-सुवर्णाख्या, बिद्रोसी बिद्र-कङ्कालो ।
बिद्रासुर-प्रमोहा च, बिद्रोत्कर्षा च बिद्र-भूत् ।।१३३

बिललिता बिलोत्पाटा, बिल्व-लिटेश-वन्दिता ।
बिभ्रि-कम्भोल-विश्वाख्या, बिभ्रत्-कुण्डल-मण्डिता ।१३४

बिछुहारा बिलुल्हा च, बिभ्रत्-किन्न-स्वरूपिणी ।
बिछु-कछुप - हारा च, बिक-कख्यानुकूलिनी ।।१३५

बिचम्भरी बिचोत्कृष्टा, बिच्याबिच्य-बिलासिनी।
बिच्य-कालक-कङ्काली, बिच-कङ्काल-मालिका ।।१३६

बिन्क-विनृ-विला-माला, बिन्क-साक्षाच-कारिणी।
बलम्बली-विश्रुहाणी, बिस्राबिस्र-निवासिनी ।।१३७

बिद्व-कद्व-कथा बिड्वी, बिड्वाबिड्व-तसान्तरा ।
बिडवाहा बिड्-विरक्ता, बिड्क-दूषक-धारिणी ।।१३८

बुद्धक्षर - समायुक्ता, बिड्-वारियानुवर्तिनी ।
बिकटाक्ष - लसोद्याना, बिकटाङ्ग-स्वरार्चिता ।।१३९

बिसत्-बृस्ना बिषद्रामा, बिष-देवा बिषत्-प्रभा ।
बिष्ट-भाला बिल-लोला, बलम्भोक-गुणात्मिका ।।१४०

बिष-हादा बिषत्-सूर्या, बिकधी बिधराधरा ।
बिकव्यम्भा बिषड्-धीरा, बिण-णंणी बिणायुधा ।।१४१

बिण-माता बिणच्पाया, ब्रिनु-चर्चा ब्रिनुत्-प्रभा ।
ब्रिस्य-हालहला-युक्ता, बिष्क्रणी बिष्क-रूपिणी ।।१४२

बिष्क्रान्तस्था बुनत्स्वर्णा, बुनकी बुष्कि-धासिनी ।
बृष्पासुर-विभेदा च, ब्रष्पाब्रष्प - करोरिणी ।।१४३

बृषम्भुला बषोम्भाला, बभ्रुदभ्रु - भयंकरी ।
बङ्णी बङणा बंग्णा, बंग्ण-गोण-सुशास्त्रिणी ।।१४४

बिणिणी-गण-मोहा च, बिगिडी-द्रध-पद्मका ।
बिल्कु-काकी बिल-कृता, बलु-केशानुमण्डिता ।।१४५

बिल्यु-लुहा बिलु-वासा, बिल्क-मित्रादि-कृन्तनी ।
बिस्क-लोला बिंहि-धरा, बिङ्गी बिम्बि-सरूषिका ॥१४६

बिङ्गिडी बगला बिम्बा, ब्रोणुणी ब्रुहु-हूं-हकी ।
बिबु - काक - हकासाला, बिजदज्ब-सुदब्रिका ॥१४७

बिलद्-द्वेषा बिल्कु-लंक्या, बिम्भु-लाहु-हकाधरा ।
बिल्मि-मस्मि-मलन्माला, बिल्मि-भूषा ब्रिजिङ्कुरा ॥१४८

बिल्मेशी बिल्म-देवेशी, बिल्माबिल्म-विवादिनी ।
बिल्मांकुश-रुजा बिल्मी, बिल्म-मध्यानुवर्तिका ॥१४९

बिल्मखण्डा बिल्म-भीमा, बिल्माबिल्म-विनायकी ।
बिल्म-छत्र-कराम्भोजा, बल्मिणी बल्म-ग्रन्थिका ॥१५०

बल्मि-धूता बल्मि-वीजा, बल्मि-गन्ध-विलेपनी ।
बल-हाल्य-हलाकारा, बम्ण-बम्ण-सुबम्णिका ॥१५१

बण-वस्त्रा बणी - भूतिर्बणि - चण्ड - विभञ्जनी ।
बृहद्-गणा बृहन्माणा, बणि-कीणी बणी-घनी ॥१५२

बणन्माता बणन्मान्या, बण - वीणा बणङ्करी ।
बणत्-कोशा बिही बोरवभी बोष - निवासिनी ॥१५३

बोख-वीजा बखो-क्रूरा, बिखाबिख्य-विवादिनी ।
बीखरी बीखदा बाखी, बख़ाबख़ - निवारिणी ॥१५४

बिखन्मूला बिलापट्टा, बिट्ट - पदेश्वरार्चिता ।
बिलुलन्धी बल-ब्रम्भी, बिम्भाबिम्भ-विधारिणी ॥१५५

बिकलण्टी बिल-हन्धी, बिलद्-गन्ध-शिवात्मिका ।
बल्वु-किटिर्बल्मु-लुटी, बल्कलल्पा बिलाम्भिकी ॥१५६

बिल्क-षष्टा बिल्क-भ्रष्टा, बिल्काबिल्क-निवासिनी ।
बिष-निष्टा बिलु-लुहा, बिलिर्बल्या बिलीषिका ॥१५७

बृह - गुहा बृहेशानी, बृह - माल्या बृहङ्करी ।
बृह - पुत्रा बृषीदंघ्रिर्बहु - बम्भल - धारिणी ॥१५८

बिकु-लल्का बिलुम्रीरा, बिभच्चष्का च बीजरा ।
बिल्मु-लुत्या बिकुम्भ्रारा, बिगुद्या बिल्क-वालिरा ॥१५९

बभि - कुष्टापहारा च, बभ्रु-भम्भण्ड-धारिणी ।
बज्ल-कोला बज्ज-गात्रा, बज्ज-गोजा बतन्मयी ॥१६०

बेद - तत्त्व - समुद्भूता, बग-गीला बलाशिनी ।
दल - हीङ्कारिणी बीषिर्बीण-कोटि-सुसक्तिका ॥१६१

बक-लक्ष- महा - कोटि - चतुःषष्टि - सुयोगिनी ।
बीती - लक्ष - महाऽनन्त - भैरवा बुबुगालिका ॥१६२

बुध - लक्ष - महा - कोटि-विष्णु-रुद्र-गणेश्वरी ।
बिभ्रद्-दर्पण-हस्ता च, बिभ्रत्-कोकिल-मण्डिता ॥१६३

बिभ्रद्-पद्म-समाख्याता, बिबुभू - भू - भयङ्करी ।
बिभ्रच्छक्ति-गदा-हस्ता, बीज-पंक्ति-समन्विता ॥१६४

बीज-जङ्घा बली बीली, बीजराम - सुरेश्वरी ।
बडवानल-महा-ज्वाला, बाणली बाण-मध्यगा ॥१६५

बुश्च-वन्द-वडी बाम्ही, बाह्लीकासुर - ब्रोटिनी ।
बह्ला बह्लेश्वरी बह्ली, बह्लीका बह्लि-कानना ॥१६६

बह्ली-रूपा बढी-जाढी, बह्लाबह्ल - स्वरूपिणी ।
बल-विन्दु-प्रभा चैव, बल - योगिनिका तथा ॥१६७

बल-सक्त-महा-योगा, बिन्दु-रुद्रा बिढत् - करा ।
बिनुनुर्णा बिहत् - पूजा, बिरुद्ध - कटलायुता ॥ १६८

बिल्कु-कूट-त्रया ब्रह्मी, बीरु-काला बिर्दुद्धिनी ।
बमलाम - महानत - विरावलि - विसंयुता ॥१६९

बकारोत्तम-वीजा च, बाला - त्रिपुर - सुन्दरी ।
बब्वी-लत-महा-देवी, बाल - लावण्य - लालिता ॥१७०

बहु-वर्षा बहु-जन्मा, बहु - पादा बल - व्रता ।
बहु - हस्ता बहु - श्रोता, बहिर्भूमि-वरेश्वरी ॥१७१

बर्हिलिङ्गा बृहन्माता, बाहिरी बलि-चक्रिणी ।
बल - कुक्कुटकी ब्रह्मी, बह्निका बद्रि-खड्गिनी ॥१७२

॥ फल-श्रुति ॥

इदं नाम-सहस्रं च, बीज-मन्त्रात्मकं शिवे !
वार - त्रय - समायुक्तमुच्चरेच्छिव - शक्तिके ॥१
भूत-प्रेत-विनाशश्च, ललिता-नामभिः समम् ।
मूल-मन्त्र-स्वरूपं च, भवेद् भूधर-नन्दिनि ! ॥२
भोग-मोक्ष-प्रदं देवी, त्रिपुरा या सुर-प्रिये !
सर्व-ज्वर-विनाशश्च, वने वह्नौ जलेऽपि च ॥३
पवने च महा-रोगे, रक्षेद् बाला शिवेश्वरी ।
उपासकं पुरुषं देवी, प्रालयेत् पाप-नाशिनी ॥४
प्रयोगानां च भूतानां, षण्णां मन्त्र-प्रयोगिका ।
महा-बाला महा-देवी, गोप्ता पर-कुलेश्वरी ॥५
करुणां देव - देवेशि ! पूर्णां कुरु शिवायुधा ।
कलि-कण्ट-महा - ग्रस्ते, सर्व-मङ्गल-सञ्चरे ! ॥६

॥ श्रीमहोत्तर-योगिनी-विद्याया शिव-शक्ति-सम्वादे महा-पटले बकारादि-बाला-त्रिपुरा-सहस्रनाम सम्पूर्णम् ॥



(संक्षिप्त)

श्रीबाला-त्रिपुरा साधना-क्रम

विनियोग—ॐ अस्य श्रीबाला-त्रिपुरा-मन्त्रस्य श्रीदक्षिणा-मूर्तिः ऋषिः। पंक्तिश्छन्दः। श्रीबाला-त्रिपुर-सुन्दरी देवता। ऐं बीजं। सौः शक्तिः। क्लीं कीलकं। श्रीबाला-त्रिपुर-सुन्दरी-प्रीत्यर्थे जपे विनियोगः।

ऋष्यादि-न्यास—ॐ श्रीदक्षिणामूर्ति-ऋषये नमः शिरसि। ॐ पंक्तिश्छन्दसे नमः मुखे। ॐ श्रीबाला-त्रिपुर-सुन्दरी-देवतायै नमः हृदि। ॐ ऐं बीजाय नमः गुह्ये। ॐ सौः शक्तये नमः पादयोः। ॐ क्लीं कीलकाय नमः नाभौ। ॐ श्रीबाला-त्रिपुर-सुन्दरी-प्रीत्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

षडङ्ग-न्यास	कर-न्यास	अङ्ग-न्यास
ॐ ऐं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ क्लीं	तर्जनीभ्यां स्वाहा	शिरसे स्वाहा
ॐ सौः	मध्यमाभ्यां वषट्	शिखायै वषट्
ॐ ऐं	अनामिकाभ्यां हुम्	कवचाय हुम्
ॐ क्लीं	कनिष्ठाभ्यां वौषट्	नेत्र-त्रयाय वौषट्
ॐ सौः	करतल-करपृष्ठाभ्यां फट्	अस्त्राय फट्

ध्यान—अरुण-किरण - जालैरञ्जिता सावकाशा,
विधृत-जप-वटीका पुस्तकाभीति-हस्ता ।
इतर-कर-वराढ्या फुल्ल-कल्हार-संस्था,
निवसतु हृदि बाला नित्य-कल्याण-शीला ।।
रक्ताम्बरां चन्द्र - कलाऽवतंसाम्,
समुद्यदादित्य - निभां त्रिनेत्राम् ।
विद्याक्ष - मालाऽभय-दान - हस्ताम्,
ध्यायामि बालामरुणाम्बुजस्थाम् ।।

मानस-पूजा—लं पृथिव्यात्मकं गन्धं श्रीबाला - त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—अधोमुख अंगुष्ठ-कनिष्ठा से । हं आकाशात्मकं पुष्पं श्रीबाला-त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—अधोमुख अंगुष्ठ-तर्जनी से । यं वाय्वात्मकं धूपं श्रीबाला-त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—ऊर्ध्व - मुख अंगुष्ठ-तर्जनी से । रं वन्ह्यात्मकं दीपं श्रीबाला-त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—ऊर्ध्व-मुख अंगुष्ठ-मध्यमा से । वं अमृतात्मकं नैवेद्यं श्रीबाला-त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—ऊर्ध्व-मुख अंगुष्ठ-अनामा से । शं शक्त्यात्मकं ताम्बूलं श्रीबाला-त्रिपुरा-पादुकाभ्यां नमः अनुकल्पयामि—ऊर्ध्व-मुख अंगुष्ठ एवं सभी अँगुलियों से ।

मन्त्र-जप—**ऐं क्लीं सौः** ।

कम-से-कम ग्यारह बार नित्य । जप कर जप-फल भगवती श्रीबाला को निम्न मन्त्र से समर्पित करे—

ॐ सर्वान्तरात्म-निलये ! स्वान्तर्ज्योति-स्वरूपिणि !
गृहाणान्तर्जपं मातः ! बाले ! देवि ! नमोऽस्तु ते ।।

श्रीगुरु आदि का पूजन-तर्पण (तीन-तीन बार) भ्रू-मध्य में होते हुए शिरस्थ सहस्रार में निम्न प्रकार करे—

१ ॐ श्रीगुरु श्रीअमुकानन्दनाथ श्रीअमुकी देव्यम्बा श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। २ ॐ श्रीपरम - गुरु श्रीअमुकानन्दनाथ श्रीअमुकी देव्यम्बा श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। ३ ॐ श्रीपरापर-गुरु श्रीअमुकानन्दनाथ श्रीअमुकी देव्यम्बा श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। ४ ॐ श्रीपरमेष्ठि - गुरु श्रीअमुकानन्दनाथ श्रीअमुकी देव्यम्बा श्रीपादुकां पूजयामि नमः, तर्पयामि नमः।

हृदय में 'कमल' की भावना करते हुए—

१ हसक्षमल - वरयूं श्रीआनन्द - भैरव-श्रीपादुकां पूजयामि नमः, तर्पयामि नमः।

२ सहक्षमलवरयीं श्रीआनन्द - भैरवी - श्रीपादुकां पूजयामि नमः, तर्पयामि नमः।

वक्ष - स्थल में अधोमुख त्रिकोण की भावना कर उसके निम्न-कोण (नाभि) में—ॐ श्रीरति श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। फिर वाम कोण (बाएँ स्तन) में—ॐ श्रीप्रीति श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। दक्ष कोण (दाएँ स्तन) में—ॐ श्रीमनोभवा श्रीपादुकां पूजयामि नमः, तर्पयामि नमः। अन्त में उक्त 'त्रिकोण' के मध्य में हृदयस्थ विन्दु में–

ॐ साङ्गां सायुधां स-वाहनां सावरणां श्रीकामेश्वर-सहितां श्रीबाला - त्रिपुर - सुन्दरी - श्रीपादुकां पूजयामि नमः, तर्पयामि नमः।



श्रीबाला-कल्पतरु

इस पुस्तक द्वारा श्रीबाला - त्रिपुर - सुन्दरी की उपासना के विभिन्न पक्षों पर अनूठा साहित्य प्रस्तुत हुआ है। यथा—

१ श्रीबाला-त्रिपुर-सुन्दरी के विविध ध्यान
२ श्रीबाला-त्रिपुर-सुन्दरी का स्वरूप-निरूपण
३ श्रीबाला-त्रिपुर-सुन्दरी की कथा
४ श्रीबाला-त्रिपुर-सुन्दरी का अर्थ
५ श्रीबाला की शक्ति
६ श्रीबाला-तत्त्व
७ भगवती श्रीबाला त्रिपुरा मातृका
८ 'त्रिपुरा' के बीजों की सरल साधना
९ त्र्यक्षरी मन्त्र की साधना
१० लघु-स्तव-राजः (स-विधि एवं स-व्याख्या)

आज ही इस पुस्तक को मँगाकर लाभ उठाएँ।



साधनोपयोगी साहित्य

हेतु

साधना-माला

पढ़े।

विस्तृत जानकारी के लिए सम्पर्क करें-